RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26
Posting Date.: 4-5, 19-20 of Every Month

॥ ओ३म् ॥
कार्यमण्वपि काले
तु कतमेत्युपकारताम् ।
महदप्युपकारोऽपि
रिक्ततामेत्यकालतः ॥
- योगवासिष्ठः, 1.7.26

विषं विषयवैषम्यं न विषं विषमुच्यते।
जन्मान्तरघ्ना विषया एकजन्महरं विषम् ॥
(महोपनिषद् - 3/54)

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
ऐश्वर्यमदमत्तानां क्षुधितानाञ्च कामिनाम्।
अहङ्काररतानाञ्च
विवेको नहि जायते ॥
(बृहन्नारदीय पुराण, पूर्व भाग - 8/103)

धनानि जीवितं चौव
परार्थे प्राज्ञ उत्सृजेद्।
सन्निमित्ते वरं त्यागो विनाशे
नियते सति॥
नारायणपण्डितः( हितोपदेशः 1.44 )

卐 वर्षम्-१३ 卐 अंकः-१६ (३०४) नवदेहली 卐 १६ फरवरीमासः २०२४तः २९ फरवरीमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८० 卐 सृष्टिसंवत्-१,९६,०८,५३,१२३ 卐 पृष्ठम्-८

## युगपरिवर्तकमहर्षेः दयानन्दसरस्वतीवर्यस्य 200तमः स्मरणजन्मोत्सवः

टंकारा /गुर्जरम् (डॉ बृजेशगौतमः) प्रसिद्ध समाजसुधारकस्य, आर्ससमाजसंस्थापकस्य, सर्वेभ्यः वेदानां द्वारोद्घाटकस्य, राष्ट्रवाद-स्वराज-स्वदेशी उद्घोषकस्य महर्षेः दयानन्दसरस्वत्याः जन्मस्थान गुजरात



प्रदेशे टंकारायां १०-११-१२दिनांके फरवरी मासीये तदीयः २००तमः जयन्तीसमारोहः भव्यतापूर्वकः आयोजितः। तत्र गुजरातस्य महामहिम राज्यपालः आचार्य डॉ देवव्रतः, सार्वदेशिक आर्यप्रतिनिधिसभा प्रधानः श्री सुरेशचन्द्रआर्यः, दयानंदमहाविद्यालयप्रबंधकसमितेः

शेषभागःद्वितीयेपुटे

## संस्कृतोन्नायक-स्वर्णिमयुगद्रष्टुः आचार्य-राधावल्लभत्रिपाठिनो जन्मदिवससमारोहः समाचरितः

भोपालम्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे संस्कृतविद्योन्नायकः, समीक्षकः , कविः ,नाट्यकारः, कथाकारः,विचारकः,लेखकः इत्यादि रूपेण विश्वधरातले प्रतिष्ठितस्य आचार्य राधावल्लभत्रिपाठिनः ७५तमस्य जन्मदिवसस्य अमृतमहोत्सवस्य अन्तर्गतं १५ फरवरी २०२४तमे दिनाङ्के भव्यरूपेण समाचरितः




। कार्यक्रमस्य मुख्यातिथि रूपेण प्रो. भूमिकेश्वरसिंहः उक्तवान् यत् राधावल्लभत्रिपाठी केवलं संस्कृतविद्यायाः उन्नायकः न, अपितु वैश्विकविद्यानां विकासपुरुष रूपेणापि प्रसिद्धः। सारस्वतातिथिरूपेण लालबहादुर-शास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालय नईदिल्लीतः प्रो भागीरथि नन्दः कथितवान् यत् आचार्य त्रिपाठी मादृशान् असंख्यान् संस्कृतभारतीयविद्या विद्यार्थिनः भविष्य निर्माणाय प्रेरयित्वा जीवनोत्कर्षं प्रदत्तवान् । विशिष्टातिथि रूपेण डा लक्ष्मीनारायण पाण्डेयः कथितवान् यत् अद्य संस्कृतक्षेत्रे ये नवाचाराः दृश्यन्ते, ते आचार्यस्क्ष राधावल्लभ त्रिपाठिनोऽतुलनीय परिश्रमपूर्ण योगदानसस्य कारणेनैव। निदेशक प्रो रमाकान्तपाण्डेयः कथितवान्

शेषभागःद्वितीयेपुटे




## उत्तर-प्रदेश-संस्कृत-संस्थानेन वाल्मीकि पुरस्कारेण देवीसहायपाण्डेयमहोदयःचितः

वृत्तप्रेषकः पङ्कजकुमारझाः, राजस्थानतः

सुविदितमेतत् समेषां शेमुषीजुषां यत् प्रत्येकं वर्षे उत्तर-प्रदेश-संस्कृत-संस्थानेन संस्कृतस्य सम्मृद्धौ



संस्कृताय स्व-सर्वस्वसमर्पितेभ्यः सतत-सारस्वत-साधन-संरतेभ्यः धीधनेभ्यः तेषां सम्माने विभिन्नेषु क्षेत्रेषु विभिन्नपुरस्काराः दीयन्ते, तस्मिन्नेव क्रमे ऐषमे वर्षे षट्चत्वारिंशत् संख्यात्मकसाहित्यकाराः पुरस्क्रियन्त इति मोदावहा सूचना समागता अस्ति तेषु साहित्यकारेषु चतुर्वेदेषु पद्यमयभाष्यं कृतवतां सरस्वत्याः वरदपुत्राणाम् अर्वाचीनर्षिणां साकेतधामवास्तव्यानां श्रीमतां डॉ.देवीसहायपाण्डेय 'दीप' इत्यभिधानलसितानां महाकवीनां कृते महर्षि वाल्मीकिपुरस्कारः घोषितः यस्य कृते सहस्त्रोत्तरद्विलक्षपरिमितवित्तं (2,01,000.00) प्रदीयते सममेव संस्कृतस्य विभिन्नेषु कार्यस्थलेषु विशिष्टतया लेखनमार्गेषु गतवतां जनानां कृतेऽपि तेषां गन्तव्यसाधनाय उपायनीक्रियते तस्मिन् कश्चन शारदायाः विशेषकृपाकटाक्षवीक्षणयुताः सुतरां स्वलेखन्या अर्वाचीनसंस्कृतजगति सर्वान् प्रेरयन्तः नवनवचिन्तनेन कार्यक्रमेण च प्रौढपाण्डित्यचित्तरञ्जकान् अपि सम्मानप्रदानरताः सततं संस्कृताय बद्धपरिकराः डॉ अरविन्दकुमारतिवारी महाभागा अपि उत्तरप्रदेशसंस्कृतसंस्थानेन विशेषपुरस्कारेण सभाजिताः भविष्यन्तीति श्रुत्वा संस्कृतमानसमयूराः मोदन्ते इति, मान्याः एतेषां महाभागानां चत्वारिंशदधिकाः शोधनिबन्धाः, शताधिक कविताः, मौलिक कृतयः षड्विंशतिसंख्याकाः प्रकाशिताः सन्ति अथ श्रीलालबहादुरशास्त्रिकेन्द्रीयसंस्कृतविश्वविद्यालयानामेते कुलगीतकर्तारः सन्ति एतादृग्भ्यां शारदासुताभ्याम् एषः पुरस्कारोऽपि पुरस्कृतो जातः। श्रीमतां अरविन्दकुमारतिवारी महाभागानां कोरोनाक्रमणम् इति कृतये पुरस्कारोद्घोषणा सञ्जाता अस्य कृते संस्थानेन एकविंशतिसहस्रात्मको राशिर्दीयते अनेन सह एतदपि संसूच्यते यत् काले काले अमरवाणी-कवि-परिषदा आभासकीय-संस्कृत-सम्मेलनमायोज्यते यस्य परिकल्पका अपि इमे आचार्या एव सन्ति सम्मेलनायोजनक्रमे वसन्तपञ्चमीमभिलक्ष्य भगवत्याः शारदायाः समर्चां विधातुं 'शारदायनम्' इति नामकः संस्कृतजगतः कर्णधाराणां संस्कृतकानने संगुञ्जितरवानां कविपुंगवानां रचनाः संकलय्य ग्रन्थः सम्पादितः यस्य सम्पादकः डॉ अरविन्दकुमारतिवारी महोदयोऽथ सह-सम्पादकः तेषामेव शिष्यः पंकजकुमारझा वर्तते अस्य ग्रन्थस्य आभासकीयानावरणमस्मिन्नेव कविसम्मेलने संस्कृतजगतः लब्धख्यातसमालोचकानां राष्ट्रपति-विश्वभारतीसदृशानेक-सम्मान-सम्मानितानाम् आचार्य रहस बिहारी द्विवेदी महाभागानामथ चतुर्वेदभाष्यकाराणाम् आचार्यदेवीसहायपाण्डेय 'दीप' इत्युपनामालंकृतानां करारविन्दाभ्यां सञ्जातम् अस्मिन् कवि सम्मेलने कवयः -डॉ.निरञ्जनमिश्रः, डॉ. शैलेश कुमार तिवारी, डॉ. सिंहासनपाण्डेयः, डॉ. बुद्धेश्वरषडंगी, डॉ. राजकुमार मिश्रः, डॉ. संजय कुमार चौबे, डॉ. सत्येन्द्र पाण्डेयः, डॉ. लक्ष्मीनारायणपाण्डेयः, डॉ. राजेन्द्र त्रिपाठी 'रसराजः', डॉ.अम्बरीशमिश्रः, डॉ. राहुलपोखरियालः, डॉ. सूर्यकान्तत्रिपाठी, पंकजकुमारझा, कवयित्रीषु गंगापुत्री डॉ. कमलापाण्डेयः, डॉ. नवलतादयः आसन् ।

कविसम्मेलनस्य धन्यवादज्ञापकः सम्मान्यः डॉ. अखिलेशकुमारमिश्रः अथ सम्पूर्णस्यापि आयोजनस्य संचालकः श्रीशम्भुत्रिपाठी आसीत् एतेषां महद्योगदानेन निर्विघ्नतया कार्यक्रमः सुसम्पन्नतामगात्।

# स्वर्गीयपारुलबालादेवीस्मृतिपुरस्कारः

वत्स देशराज शर्मा

असमप्रान्तस्य षट्पञ्चाशत्तमकामरूप-महाविद्यालयस्य वार्षिकसभा ०५/०२/२०२४ इति दिनाङ्के सुसम्पन्ना। गतवर्षीयसंस्कृतस्नातकपरीक्षायां निशिस्मितावर्मनेति छात्रा महाविद्यालयस्य छात्रेषु



सर्वोच्चांकप्रापका वर्तते। तस्यै छात्रायै स्वर्गीयपारुलबालादेवीस्मृतिपुरस्कारं दत्तवान् कामरूप-महाविद्यालयस्य सहकार्यध्यापकः डॉ.सुबोधकुमारमिश्रभागवतीति, यः वैदिकगणीयासमप्रदेशस्य प्रतिनिधिरूपेण कार्यलग्नः वर्तते। डॉ.सुबोधकुमारमिश्रभागवतीदेवस्य वैदिकगणीयगीतपुस्तकं "संस्कृतगीतिचन्द्रिकां",पण्डितविष्णुकान्तशुक्लविरचितं श्रीकृष्णनामकोशः इति ग्रन्थं चेत्यादि बहुपुस्तकानि निशिस्मितावर्मनेति छात्रायै मिश्रभागवतीदेवः मातृस्मृतिरक्षणात्मपुरस्काररूपेण निवेदयति।

# मऊजनपदे अनौपचारिक-केन्द्रे 'आकांक्षा' स्वर्णपदकं प्राप्तवती

- डॉ. नेहामिश्रा,

मऊ -उ.प्र.। केन्द्रीयसंस्कृतविश्वविद्यालयस्य अनौपचारिकसंस्कृतशिक्षणस्य केन्द्रे सन्तगणिनाथराजकीयमहाविद्यालये मऊ जनपदे गतवर्षस्य प्रमाणपत्रीय पाठ्यक्रमस्य दक्षता पाठ्यक्रमस्य च प्रमाणपत्रवितरणम् अभवत्। महाविद्यालयस्य प्राचार्या डॉ हूर तलत महोदया केन्द्रस्य केन्द्राधिकारी डॉ चन्द्रकान्तदत्तशुक्ल महोदयः केन्द्रशिक्षिका डॉ नेहा मिश्रा च महाविद्यालये छात्रेभ्यः, छात्राभ्यश्च प्रमाणपत्रं



स्वर्णपदकं रजतपदकं कांस्यपदकं च दत्तवन्तः। आकांक्षा, रीना अनन्या, शालिनी, महक, अंकिता, रोशन, शिल्पा, अंगद, मधुरिमा, आकांक्षा इत्यादयः छात्राः उत्तमम् अङ्कं प्राप्तवन्तः। पाठयेम संस्कृतं जगति सर्वमानवान्। प्रापयेम भारतं सपदि परं वैभवम्।।

प्रथमपुटस्य शेषभागः

## युगपरिवर्तक महर्षेः दयानन्द....

प्रधानः पद्मश्री डॉ पूनम सूरी, दिल्ली आर्य प्रतिनिधि सभा प्रधानः श्री धर्मपाल आर्यः,महामन्त्री श्री विनय आर्यः,श्री प्रकाश आर्यः,प्रो विनय विद्यालंकारः,डॉ वागीश आचार्यः,डॉ सुमेधा आचार्या,डॉ नन्दिता शास्त्री ,डॉ वेदपालः,डॉ ज्वलन्त कुमार शास्त्री,डॉ राजेन्द्र विद्यालंकारः इत्येते उपस्थिताः आसन्। अवसरेस्मिन् आचार्य देवव्रतः पूर्ण विश्वस्मात् आगतान् आर्य जनान् मतभेदं विस्मृत्य स्वामिनो दयानंदस्य स्वप्नान् साकारीकर्तुं एकत्रितान् च भवितुम् आहूतवान्। प्रधानमंत्रिणा मोदिना अत्र प्रारब्धं कार्यं यत् टंकाराभूमिः संपूर्ण विश्वस्य आर्यजन तीर्थ स्थलरूपेण घोषिता स पद्मश्री पूनम सूरी महर्षि दयानंदस्य स्वप्नान् साकारीकुर्वती संस्थायाः डी ए वी इत्यस्याः शिक्षा क्षेत्रे उपलब्धीः प्रकाशितवती । समापने महामहिम राष्ट्रपति श्रीमती द्रौपदी मुर्मूः मुख्य अतिथिः अवर्तत। गुजरातस्य मुख्यमंत्री श्री पटेलः, केन्द्रीय मंत्री श्री पुरुषोत्तम रूपाला, सहिताः विशिष्ट अतिथि रूपेण योगगुरु स्वामी रामदेवः, आचार्य बालकृष्णः, परमार्थ निकेतनस्य स्वामी चिदानंदः,कथाकार श्री रमेश भाई ओझा कार्यक्रमे सहभागितां कृतवन्तः ।

राष्ट्रपति द्रौपदी मुर्मूः यज्ञशालायां राज्यपालेन आचार्येण डॉ देवव्रतेन सह होममकरोत्। योग-ऋषि बाबा रामदेवः कथितवान् पतंजलि योगपीठ द्वारा अनुष्ठीयमानाः समग्र- उपक्रमाः महर्षि दयानंदस्य शिक्षया प्रेरिताः सन्ति। दयानंदस्य जीवनं प्रत्याधारिता एका नाटिका अपि प्रदर्शिता। संचालनं श्री विनय आर्य द्वारा विहितम् । समारोहे देशस्य समस्य प्रान्तेभ्यः सहस्र आर्य प्रतिनिधिभिः सह विदेशस्यापि आर्यसामाजिक सदस्याः आयोजने भागं गृहीतवन्तः।

# लक्ष्मणपुरे 'सरलमानकसंस्कृतम्' इत्यस्मिन् विषये राष्ट्रियकार्यशाला सम्पन्ना'

वार्ताहरः- प्रवेशकुमारशुक्ल,

लखनऊ। भारतसर्वकारस्य भारतीयभाषासमितिः, केन्द्रीयसंस्कृतविश्वविद्यालयः (लखनऊ-परिसरः) श्रीबाबानिबकरौरीजीवेदविद्यालयः (हनुमानसेतुः) चेत्येतेषां संयुक्तोद्यमेन दिनाङ्कः 09.02.2024 तमे दिनाङ्के 'सरलमानकसंस्कृतम्' इति विषये कार्यशालायाः आयोजनं जातम्। श्रीबाबानीबकरौरीजीवेदविद्यालयस्य



सभागारे अयं कार्यक्रमः प्रातः 10:00 वादनतः सायं 05:00 वादनपर्यन्तं आयोजितः।

कार्यशालायाः अध्यक्षता केन्द्रीयसंस्कृतविश्वविद्यालयस्य (लखनऊपरिसरस्य) माननीयनिदेशकः प्रो. सर्वनारायणझाः अकरोत्। असौ स्वीये वक्तव्ये उक्तवान् यत् 'शिक्षाक्षेत्रे सरलमानकसंस्कृतस्य उपयोगेन अनुवादं विना अपि शैक्षणिकक्रियाकलापाः उत्तमरीत्या सम्पादयितुं शक्यन्ते। वाणिज्य-विधि-प्रबन्धन-समाजशास्त्र- इतिहासादिविविधविषयेषु 'सरलमानकसंस्कृतस्य उपयोगेन अध्ययनाध्यापने सम्पादयितुं शक्येते। एवमेव उत्तराखण्डे द्वितीयराजभाषात्वेन स्वीकारानन्तरं तु सरलमानकसंस्कृतेन लोव्यवहारस्य समधिका आवश्यकता अनुभूयते।

अस्यां कार्यशालायां देशस्य प्रख्याताः विद्वांसः स्वीयान् अमूल्यान् विचारान् प्रस्तुतवन्तः।

प्रथमसत्रे "किमर्थं सरलमानकसंस्कृतम्" इति विषये व्याकरणशास्त्रस्य अग्रगण्यो विद्वान् केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरस्य व्याकरणविभागस्य प्राध्यापकः प्रो. भारतभूषणत्रिपाठी 'सरलमानकसंस्कृतेन' सह 'सरलमानकव्याकरणस्य' प्रयोगस्य विषये स्वाभिप्रायं प्रायच्छत। स्ववक्तव्ये बहुभिः उदाहरणैः असौ संस्कृतस्य सरलं शुद्धं च प्रयोगं स्यादिति उक्तवान्।

द्वितीयसत्रे "सरल-मानक-संस्कृतस्य स्वरूपम्" इति विषयाधारिते व्याख्याने बिहारस्य दरभङ्गास्थ-कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयस्य व्याकरणविभागस्य सहायकाचार्यः डॉ. यदुवीरस्वरूपब्रह्मचारी हलन्तशब्दानां स्थाने प्रकारान्तरेण अजन्तशब्दानां प्रयोगस्य प्रविधिं प्रास्तौत्। स्वभाषणे सः सरलमानकसंस्कृतस्य स्वरूपं विविधदृष्ट्या स्पष्टीकृतवान्।

तृतीयसत्रे लखनऊपरिसरस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य व्याकरणविद्यालयस्य आचार्यः प्रो. धनीन्द्रकुमारझाः 'सरलमानकसंस्कृतेन प्रौढसंस्कृतस्य परिवर्तनस्याभ्यासः' इति विषये व्यवस्थितरूपेण व्याख्यानं प्रदत्तवान्। स्वव्याख्याने सः अवदत् यत् समाजे संस्कृतं प्रौढं कठिनं च मन्यते, परन्तु व्याकरणे किञ्चित् परिवर्तनं कृत्वा संस्कृतस्य प्रयोगः सरलतया शुद्धतया च कर्तुं शक्यते।

चतुर्थे सत्रे लखनऊविश्वविद्यालयस्य संस्कृतविभागस्य सहायकाचार्यः डॉ. अशोककुमारशतपथी 'सरलमानकसंस्कृतस्य क्रियान्वयनम्' इत्यस्मिन् विषये स्वविचारान् प्रकटयन् अकथयत् यत् 'शिक्षाक्षेत्रे अनुवादं विना अपि संस्कृतस्य प्रयोगः सम्यक्तया कर्तुं शक्यते।' इति। लोकव्यवहारे तस्य प्रयोगेन संस्कृतं जनानां मध्ये व्यापकं भविष्यति।

पञ्चमे सत्रे लखनऊस्थ-नवयुगकन्या-महाविद्यालयस्य आचार्या प्रो. रीतातिवारीमहोदया कार्यालयेषु शैक्षणिकसंस्थासु च संस्कृतस्य सरलमानकस्वरूपस्य कार्यान्वयनस्य महत्त्वपूर्णान् उपायान् उत्तमरीत्या अकथयत्।

अस्याः कार्यशालायाः समन्वयकः डॉ. चन्द्रकान्तद्विवेदी, संयोजकः डॉ. प्रफुल्लगडपालः सहसंयोजकः डॉ. रुद्रनारायणनरसिंहमिश्रः च आसन्। कार्यशालायां प्रायः 200 छात्राः नागरिकाश्च भागग्रहणं कृतवन्तः।

प्रथमपुटस्य शेषभागः

## संस्कृतोन्नायकः स्वर्णिमयुगद्रष्टुः....

यत् संस्कृत जगति आजीविकानां सम्भावनां पूज्य राधावल्लभत्रिपाठी अन्विष्य उपस्थापितवान् । अध्यक्षीय वक्तव्यं वदता कुलपतिना श्रीनिवासवरखेडीवर्येण कथितं यत् अद्य यत् संस्कृत नाट्यविद्यानां प्रचार-प्रसार क्रान्तिः लक्ष्यते तज्जनकः आचार्य त्रिपाठी एव मान्यः। संस्कृतरूपक नाट्यशास्त्रीय प्रयोगं प्रति सर्वाधिक प्रोत्साहनं त्रिपाठिवर्येणैव दत्तम्। तेन प्रसन्नता व्यक्तीकृता यत् विश्वविश्रुत आचार्यत्रिपाठिनं केन्द्रीकृत्य अद्य विश्वविद्यालयस्य भोपालपरिसरच्छात्रैः, अध्यापकैः, समाजस्य सुप्रतिष्ठित जनैः सहिताः सर्वेपि राधावल्लभत्रिपाठिनो जन्मदिवसं अमृतमहोत्सव रूपेण आयोज्य गौरवम् अनुभवन्तः सन्ति । अस्मिन् सारस्वतामृतम् अमृतमहोत्सव कार्यक्रमे समग्रे आभासीय पटलेपि विद्वांसः स्व विचारान् प्रो रामलखनपाण्डेयः लखनऊ, प्रो विजयपालशास्त्री, हरिद्वारं, प्रो रामकुमारशर्मा, जयपुरं प्रत्यक्ष रूपेम उपस्थितेषु प्रो सुबोध शर्मा, प्रो अर्चना दुबे , प्रो सनन्दनकुमारत्रिपाठी, प्रो नीलाभतिवारी च भा्वाभिव्यक्तिं प्रकटितवन्तः । अस्य अमृतमहोत्सवस्य सन्ध्या सांस्कृतिक सन्ध्या स्वरूपेण दृष्ट्वा परिसरस्य नाट्य शास्त्रानुसन्धान केन्द्रमपि सांस्कृतिक सद्भावनां प्रकटीकुर्वत् प्रस्तुतीः प्रास्तौत् तत्र प्रियंवदा पौडियालः भरतनाट्यम् मनोहारी प्रस्तुतितः सभा मन्त्रमुग्धा जाता तत्र डा संजय द्विवेदी मधुर संगीतेन, मुंबईतः प्राप्ता कलासाधिका श्रीमती चिन्मयि-जोयलमुखर्जी कवितया भावं स्वं दर्शितवती। आयोजकपरिसरेण सारस्वत अनुष्ठाने भारतीय परम्परानुसारम् आचार्यः अमृताभिषेकं कृत्वा अभिनन्दन पत्रं, राङ्कवं, श्रीफलं पुष्पाहरं च प्रदाय सम्मानितः । कार्यक्रमस्य आरम्भे सरस्वती वन्दना , नाट्य अनुसन्धान केन्द्रस्क्ष आकाश गुण्टीवारः, मनोजपाटीदारः, स्नेहापाण्डेयः च स्वागतभाषणं प्रो रमाकान्तपाण्डेयः धन्यवादं डा कृपाशंकरशर्मा च अकरोत् । इस कार्यक्रमे महत्संख्यायां छात्राः अध्यापकाः शोधार्थिनः सामाजिक जनाः च उपस्थिताः आसन्।

# ‘सरलमानकसंस्कृतम्’ इति विषये राष्ट्रियकार्यशाला सम्पन्ना’

वार्ताहरः- प्रवेशकुमारशुक्लः,

अयोध्या। भारतसर्वकारस्य भारतीयभाषासमितिः, केन्द्रीयसंस्कृतविश्वविद्यालयः (लखनऊ परिसरः), उत्तरप्रदेशस्य अयोध्यास्थश्रीनिवासबोधायनरामानुजसंस्कृत- महाविद्यालयश्चेत्येतेषां संयुक्ततत्वावधानेन 11/02/2024 दिनाङ्के ‘सरलमानकसंस्कृतम्’ इति विषये एकदिवसीयराष्ट्रियकार्यशालायाः आयोजनं कृतम्। कार्यक्रमोऽयं



श्रीनिवासबोधायनरामानुजसंस्कृतमहाविद्यालये, उत्तरतोताद्रिमठे, अयोध्यायाम् (उत्तरप्रदेशे) प्रातः १०:०० वादनतः सायं ०५:०० वादनपर्यन्तं पञ्चसत्रेषु आयोजितमासीत्।

शिक्षाक्षेत्रे सरलमानकसंस्कृतस् ‘प्रयोगेन अनुवादं विना अपि शैक्षणिककार्याणि उत्तमरीत्या सम्पादयितुं शक्यन्ते। विविधविषयेषु श्सरलमानकसंस्कृतम्’ इत्यस्य उपयोगेन अध्यापनं कर्तुं शक्यते। आदर्शान् स्थापयित्वा संस्कृतस्य सरलरूपं पूर्णशिष्टाचारेण सह व्यावहारिकप्रयोगे स्थापितं भवति। एतदेव कार्यक्रमस्यास्य अध्यक्षः केन्द्रीयसंस्कृतविश्वविद्यालयस्थलखनऊपरिसरस्य निदेशकः प्रो. सर्वनारायणझामहोदयेन प्रतिपादितम्।

प्रथमसत्रे शकिमार्थं सरलमानकसंस्कृतम्’ इति विषये व्याकरणस्य सर्वोच्चविद्वान् केन्द्रीयसंस्कृतविश्वविद्यालयस्थलखनऊपरिसरस्य व्याकरणविद्याशाखायाः आचार्याः प्रो.भारतभूषणत्रिपाठीमहोदयाः ‘सरलमानकव्याकरणस्य’ प्रयोगे बलं दातुमुक्तवन्तः।

द्वितीयसत्रे ‘सरल-मानक-संस्कृतस्य स्वरूपम्’ इति व्याख्यानं पुरीस्थ (ओडिशाराज्यस्य) केन्द्रीयसंस्कृतविश्वविद्यालयस्थश्रीसदाशिव परिसरस्य शिक्षाशास्त्र विद्याशाखायाः आचार्याः प्रो.रमाकान्तमिश्रमहोदयाः स्वीयभाषणे सरलमानकसंस्कृतस्य स्वरूपं विविधदृष्ट्या व्याख्यानं प्रदत्तवान्।

तृतीयसत्रे अयोध्यास्थश्रीत्रिदण्डीदेवसंस्कृतमहाविद्यालयस्य साहित्यविभागाध्यक्षेण श्रीब्रजेशकुमारपाण्डेयमहोदयेन ‘सरलमानकसंस्कृतेन प्रौढसंस्कृतस्य परिवर्तनस्याभ्यासः’ इति विषये सुचारुव्याख्यानं प्रस्तुतम्। समाजे अस्माकं व्यवहारे च संस्कृतभाषा कथं सुलभतया प्रयोक्तुं शक्यते इति विषये स्वव्याख्याने सः प्रस्तुतवान्। अस्मिन् केचन प्रयोगाः अपि तेन व्याख्याताः। यथा ‘गुड मॉर्निंग’ इत्यस्य स्थाने ‘सुप्रभातम्’, ‘थैंक यू’ इत्यस्य स्थाने ‘धन्यवादः’ इत्यादयः।

चतुर्थसत्रे (उत्तरप्रदेशस्य) लखनऊस्थबाबासाहेबभीमरावअम्बेडकर-विश्वविद्यालयस्य संस्कृत-वैदिक-अध्ययनविभागस्य डा. विपिनकुमारझामहोदयाः ‘सरलमानकसंस्कृतस्य क्रियान्वयनम्’ भिन्न-भिन्न-विधिनाम् कार्यान्वयनेन कथं सरल-शिक्षां प्राप्तुं शक्यते’ इति विषये स्व-विचारं प्रकटितवान्। शिक्षाक्षेत्रे संस्कृतसम्भाषणेन सरलमानकसंस्कृतं वर्धयितुं शक्यते।

पञ्चमसत्रे श्रीनिवासबोधायनरामानुजसंस्कृतमहाविद्यालयस्य प्रवक्ता डॉ. राकेशकुमारशुक्लः ‘सरलमानकसंस्कृतस्य क्रियान्वयनम्’ इति विषये स्वविचारं प्रकटयन् कार्यालयेषु, शैक्षणिकसंस्थासु च सरलसंस्कृतं कार्यान्वयितुं महत्त्वपूर्णान् उपायान् कथितवान्। कथं लोकव्यवहारे प्रयोगे च संस्कृतं जनानां मध्ये व्यापकतया भवेदिति विषये उक्तवान्।

कार्यशालायाः प्रबन्धकः डॉ. कुलदीपमिश्रः, संयोजकः डॉ. रुद्रनारायणनरसिंह मिश्रः तथा च सहसंयोजकः डॉ. प्रफुल्लगडपालमहोदयाः उपस्थिताः आसन्। कार्यशालायां प्रायः २०० छात्राः भागं गृहीत्वा लाभान्विताः अभवन्।

# सप्तविंशतितमः राष्ट्रियपक्षिमेला

जयपुर। २०२४ तमस्य वर्षस्य फरवरी-मासस्य ९, १० दिनाङ्केषु जयपुरस्य जलमहल-नगरे आयोजिते सप्तविंशतितमे पक्षिमेलायां







राजस्थान-शिक्षक-प्रशिक्षण-संस्थायाः, जयपुरस्य प्रशिक्षुणः शिक्षकाः च भागं गृहीतवन्तः ।अस्मिन् वर्षे पक्षिमेलायां विषयः आसीत् ‘प्रकृतिं गृहं प्रति आहूय’ इति महाविद्यालयस्य प्रशिक्षुणां कृते आयोजिते विशेषसत्रे सप्तविंशतितमे पक्षिमेलायां आगतैः पक्षिविशेषज्ञैः पर्यावरणविदैः च प्रवासीपक्षिणां स्थानीयपक्षिणां च चर्चा कृता। विशेषज्ञाः पक्षिणां कृते उपायाः, तेषां कृते आवश्यकाः पर्यावरणव्यवस्थाः च व्याख्यातवन्तः । सत्रे आयोजकाः प्रश्नोत्तरकार्यक्रमे भागं गृहीतवन्तः प्रशिक्षुभ्यः पुरस्कारं दत्तवन्तः। पक्षिमेलायां विभिन्नस्थानानां पक्षिविशेषज्ञाः विभिन्नप्रकारस्य स्तम्भेषु प्रशिक्षुभ्यः पक्षिविषये विविधाः सूचनाः दत्तवन्तः।

मनसागरसरोवरे जलमहले च प्राप्ताः विविधाः पक्षिणः महाविद्यालयस्य प्रशिक्षुभ्यः दूरबीनद्वारा, दूरदर्शनेन च दर्शिताः। ब्ल्याक् नेक् बर्ड, किङ्ग्फर्श प्लैकन बर्ड, नीलकण्ठ इत्यादयः पक्षिणः प्रशिक्षुभ्यः दूरबीनद्वारा दर्शिताः, तेषां सम्बन्धी सूचना अपि प्रदत्ता।

प्रतिवर्षं पक्षिमेलायां महाविद्यालयस्य उत्साहेन सहभागितायाः कृते आयोजकाः प्राचार्या डॉ. मनीषा




शर्मा इत्यस्याः धन्यवादं कृतवन्तः। अस्मिन् अवसरे प्राचार्या डॉ. मनीषा शर्मा अवदत् यत् प्रतिवर्षं प्रशिक्षुणां पक्षिमेलायां प्रेष्य पक्षिणां महत्त्वं ज्ञापयन्ति। प्रतिवर्षं विभिन्नस्थानात् सहस्राणि पक्षिणः मनसागरसरोवरम् आगच्छन्ति । मनसागरसरोवरस्य उद्धाराय अस्माभिः प्रयत्नाः करणीयाः। एतादृशानां स्थानानां संरक्षणस्य आवश्यकता वर्तते। अस्मिन् अवसरे महाविद्यालयस्य परिसरे पक्षिणां भोजनजलस्य व्यवस्था अपि कृता ।

# ‘सरलमानकसंस्कृतम्’ इति विषये राष्ट्रियकार्यशाला सम्पन्ना

वार्ताहरः- प्रवेशकुमारशुक्लः

लक्ष्मणपुर। भारतसर्वकारस्य भारतीयभाषासमितिः, उत्तारप्रदेशस्थकेन्द्रीयसंस्कृत विश्वविद्यालयस्य, लखनऊपरिसरः चेत्यनयोः संयुक्ततत्वावधानेन दिनाङ्कः



१२/०२/२०२४ दिनाङ्के ‘सरलमानकसंस्कृतम्’ इति विषये एकदिवसीयराष्ट्रियकार्यशालायाः आयोजनं कृतम्। अस्य कार्यक्रमस्य आयोजनं केन्द्रीयसंस्कृतविश्वविद्यालये, लखनऊपरिसरे, लखनऊ(उत्तरप्रदेशे) प्रातः १०:०० वादनतः सायं ०५:०० वादनपर्यन्तं पञ्चसत्रेषु आयोजितमासीत्।

अस्यां कार्यशालायां विविधाः विद्वांसः कुशलतया सरलमानकसंस्कृतं संक्षिप्तरूपेण प्रस्तुतवन्तः। कार्यशालायाः अध्यक्षातां कुर्वन् केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरस्य माननीयनिदेशकेन प्रो.सर्वनारायणझामहोदयेन कथितं यत् शास्त्रेषु उक्ताः विषयाः सरलसंस्कृतेन व्यक्ताः भवेयुः। येन छात्राः लाभं प्राप्स्यन्ति।

प्रथमसत्रे ‘किमर्थं सरलमानकसंस्कृतम्’ इति विषये (ओडिशाराज्यस्य) केन्द्रीयसंस्कृतविश्वविद्यालयस्थश्रीसदाशिव परिसरस्य शिक्षाशास्त्र विद्याशाखायाः आचार्याः प्रो. रमाकान्तमिश्रमहोदयाः स्वीयभाषणे सरलमानकशाब्दिकप्रयोगस्य आवश्यकता सन्दर्भे प्रतिपादितवन्तः।

द्वितीयसत्रे ‘किमर्थं सरलमानकसंस्कृतम्’ इति विषये उत्तारप्रदेशस्थालखनऊविश्वविद्यालयस्य संस्कृत-प्राकृतभाषाविभागस्य पूर्वविभागप्रमुखाः प्रो. ओमप्रकाशपाण्डेयमहोदयाः स्वमतं सरलरूपेण प्रकटितवन्तः।

तृतीयसत्रो उत्तारप्रदेशस्य कानपुरस्थविक्रमजीतसिंहसनातनधर्ममहा- विद्यालयस्य प्राचार्याः डॉ. नवलतामहोदयाः ‘सरल-मानक-संस्कृतस्य स्वरूपम्’ इति विषये स्वस्य बहुमूल्यं वक्तव्यं प्रस्तुतवत्यः।

चतुर्थसत्रे उत्तरप्रदेशस्थलखनऊविश्वविद्यालयस्य संस्कृतविभागस्य पूर्वविभागप्रमुखाः प्रो. रामसुमेरयादवमहोदयाः ‘सरलमानकसंस्कृतेन प्रौढसंस्कृतस्य परिवर्तनस्याभ्यासः’ इति विषये स्वमतं प्रकटयन् काव्यपरिपक्वतायाः सरलीकरणाय, व्याकरणस्य प्रयोगाय च स्वमतं प्रकटितवन्तः।

पञ्चमसत्रे उत्तरप्रदेशस्थ लखनऊविश्वविद्यालयस्य संस्कृत-प्राकृतभाषाविभागस्य सहायकाचार्याः डॉ. सत्यकेतुमहोदयाः ‘सरलमानकसंस्कृतस्य क्रियान्वयनम्’ इति विषये व्याख्यानं प्रस्तुतवान्। वैदिकवाङ्मयात् आरभ्य प्राविधिकक्षेत्रं यावत् सर्वे अंशाः कथं सरलसंस्कृतेन व्याख्यातुं शक्यते। इत्यस्मिन् सन्दर्भे चर्चां कृतवन्तः।

डॉ.प्रफुल्लगडपालमहोदयानां संयोजनया डॉ. रुद्रनारायणनरसिंहमिश्रमहोदयानां सहसंयोजनया च कार्यक्रमोऽयं अनुष्ठितः। कार्यशालायां प्रायः १७० छात्राः भागं गृहीत्वा लाभान्विताः अभवन्।

# सम्पादकीयम्

सम्मानिताः सुजनाः!

सादरं नमोनमः।

गतेषु दिनेषु स्वामिदयानंदसरस्वतीनां जन्मस्थल्यां टंकारानगरे (गुजराते) तेषां द्विशततम (200) जन्मोत्सवः महता आनन्देन गौरवेण च आचरितः। अस्मिन् त्रिदिवसीयकार्यक्रमे देशस्य सर्वेषां राज्यानां आर्यजनाः विदेशात् आगताः आर्यसमाजसंस्थाप्रतिनिधयः च भागम् ग्रहीतवन्तः। वस्तुतः एतादृशानां कार्यक्रमाणां आयोजनं समयस्य आवश्यकता वर्तते । स्वामिदयानंदमहोदयानां शिक्षाः अद्यापि प्रासंगिकाः वर्त्तन्ते स स्वामीदयानंदाः महान्तः शिक्षाविदः, समाजसुधारकाः , सांस्कृतिकराष्ट्रवादस्य च प्रवलाः समर्थकाः आसन् । स्वामिदयानंदमहोदयानां महत्त्वपूर्णं योगदानं आर्यसमाजस्य स्थापनं वर्त्तते। यया शिक्षाधर्मक्षेत्रे च क्रांतिकारिः परिवर्तनम् अभूत् । एवञ्च स्वामिदयानंदमहोदयानां त्रीणिप्रसिद्धयोगदानानि अपि वर्त्तन्ते।यस्य कृते तेषां स्मरणं भवति। तेषु सत्यार्थप्रकाशः, वेदभास्यभूमिका, वेदभाष्यम् च अस्ति। महर्षिदयानंदाः धर्ममर्मज्ञाः, आर्यसमाजस्य संस्थापकाः ,समाजसुधारकाः हिंदी-संस्कृतस्य प्रचारकरूपेण प्रसिद्धाः आसन्। स्वामिदयानंदाः प्राचीनभारतीयशिक्षापद्धत्याः समर्थकाः आसन् । ते आङ्गलशिक्षायाः विरोधिन्ः प्राचीनभारतीयज्ञानपरंपरानुसारं वेदोपनिषद् - स्मृतिधारितशिक्षायाः अध्ययनस्य आरम्भं कृतवन्तः । स्वामिवार्याणाम् उद्देश्यं वैदिकधर्मस्य भारतीयमूल्यानां प्रचारं - प्रसारं, संरक्षणं च आसीत। स्वामिदयानंदमहोदयैः क्रान्त्याः अपेक्षया परिष्काराय महत्त्वं दत्तम् स ते वेदानां प्रचार-प्रसार सहैव तेषां व्याख्यायाः च कार्यं संपादितवन्तः। वेदानां वास्तविकं स्वरूपं च उपस्थापितवन्तः । स्वामीवर्याः समाजे स्त्रिणां स्थानं महत्वपूर्णम् आमनन्ति स्म स ते स्त्री-पुरुष द्वयोः समानतायाः पूर्णसमर्थनं कुर्वन्ति स्म स समाजस्य कुरीति-पाखंडस्य च विरोधिन्ः आसन्। किन्तु तेषां मतानां समर्थकैः मूर्तिपूजाविरोधरूपेण प्रचारिताः । अनेन समाजे नाना भ्रांत्याः व्याप्ताः अभूवन्।

मूर्तिपूजाविरोधं सनातनधर्मस्य विरोधम् इति सिद्धम् अभवत। अधुना पुनः स्वामिदयानंदवार्याणाम् आदर्शान् अङ्गीकारस्य आवश्यकता विद्यते। डी.ए.वि. शिक्षणसंस्था अस्मिन् क्षेत्रे महती भूमिका निर्वहति। सर्वकारस्यापि अस्यां दिशायां सह्योगं अपेक्ष्यते। तदा एवस्वामिवार्याणाम् स्वप्नान् पूर्णं कर्तुं शक्यते।

भवदीया

सम्पादिका

## ॥ वेद वाणी ॥

अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान् ।
किं नूनमस्मान्कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ॥
त्वं नः सोम विश्वतो वयोधास्त्वं स्वर्विदा विशा नृचक्षाः ।
त्वं न इन्द ऊतिभिः सजोषाः पाहि पश्चातादुत वा पुरस्तात् ॥

'We have drunk the Soma juice .We have become immortal. We have attained the divine light. We have understood the power of Divinity. What harm can our enemies and evil -minded people do to us?"O ! Soma Juice! Give us food from every direction. You know men well.You study them too. Be get absorbed in us. You may thus guard our well-being. Protect us from the front and back.'

The Rig Veda 8.48.3/15

'य आध्राय चकमानाय पित्वोऽन्नवान्सन्रफितायोपजग्मुषे ।
स्थिरं मनः कृणुते सेवते पुरोतो चित्स मर्डितारं न विन्दते॥
स इद्भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय ।
अरमस्मै भवति यामहूता उतापरीषु कृणुते सखायम्॥
न स सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः ।
अपास्मात्प्रेयान्न तदोको अस्ति पृणन्तमन्यमरणं चिदिच्छेत् ॥'

'A person who, despite being endowed with sufficient food, refuses to give it to the weak, poor or hungry and eats in front of them would get no comfort from anyone in future.""He is a true giver who gives food to an emaciated and hungry man that approaches him for the same. Such a person attains all auspicious gains of a sacrificial fire. He will also win over an enemy to his side. ""He is not a friend who does not give food to his friend or companion. They should leave such a cruel man and go far away. He will not find a dwelling place for himself. One must seek shelter of only such a person who generously gives food to others.'"

The Rig Veda 10.117.2/3/4

'तन्तुं तन्वन्रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान् ।
अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनम् ॥'

'O ! Agni Deva( God of Fire)! Extend sacrificial fires. Follow the path of Surya ( Sun God) that radiates the world and enter the solar orb.Protect the high and radiant paths earned through meritorious deeds. Make worshippers' works happy and free from blame. Lett man be a virtuous human like the sages. Let him father heavenly people.'

The Rig Veda 10.53.6

**संकलन : एस.वासुदेव रावः**

# वेदे राष्ट्रभावना

**-श्री हरेन्द्रनारायणदेवःगोस्वामी**
काव्यभूषणम्
सत्राधिकारी, श्रीश्री द्विपरसत्रम्
कैठालकुछि ( ७८१३७० )
नलबारी, असमप्रान्तः।

राजते इति राष्ट्रम् (राज्+ष्ट्रन्) इति राष्ट्रपदस्य व्युत्पत्तिः । अर्थो भवति-राज्यं, देशः, प्रान्त इत्यादयः । साम्प्रतं (आधुनिककाले) राष्ट्रं भवति केवलं शासनकेन्द्रिकम्, सांस्कृतिक समन्वयभावकं गुरुत्वं न लभ्यते। परन्तु प्राचीने काले राष्ट्रमासीत् शासनेन साकं सांस्कृतिकसमन्वयपरकमपि सर्वेषां जनानां सर्वविधसमृद्धिपरकमपि । अतएव भिन्न-भिन्नराज्ञां शासने सति अपि भारतराष्ट्रमेकं सांस्कृतिकपरकं राष्ट्रम् अत्र नास्ति कोऽपि सन्देहः। केचन वामपन्थिनः चिन्तयन्ति यत् भारतराष्ट्रम् - बृटिश्शासनात् जातं (पूर्व नासीत्) इति एतन्मतं न ग्राह्यं न विचारसहम् ।

सहस्रशो वर्षेभ्यः पूर्वमपि ऋषि-मुनिवन्दितं भारतं सर्वथा भारतं (भा = ज्ञानम्) राराजमानं वर्त्तते । अशेषविषयाणां ज्ञानराशिप्रदानेन अस्य देशस्य स्थानं शिरसि विराजते। नैके मन्त्राः राष्ट्रपरकत्वं पोषयन्ति। अत्र केवलं केषाञ्चन मन्त्राणां सहायेन अस्मदीयो लेख उपस्थाप्यते।

ऋग्वेदे उल्लेखो जायते यत् एषा पृथिवी सुखदा, निष्कण्टका, निवासयोग्या भवतु इति

**स्योना पृथिवि भवानृक्षरा निवेशनी। (ऋग्वेदे १. २२.१५)**
**यजुर्वेदे आह्वानं ततोऽधिकं श्रूयते, यथा**
**वयं राष्ट्रे जागृयाम पुरोहितः (१.९.२३)**

वयं राष्ट्रस्य पुरोहिताः सदा जागृयाम अत्र राष्ट्रम् अस्माकं कृते सर्वम्, अस्य कृते अस्माकं जागरूकता स्यात् इति भावः । यथा पिता अपत्यस्य रक्षकः, पालकः भवति; माता अन्नदात्री पोषिका भवति तथैव वयं सर्वेऽस्मिन् राष्ट्रे जागरूका भवामः । पुरोहितस्य दायित्वं यागयज्ञादिषु पुरतः स्थिता यथा कल्याणचिन्तनं भवति, तथैव वयमपि अग्रतो भूत्वा अस्य कल्याणार्थं यतमाना भवामः । अर्थात् सैनिकवत् कर्त्तव्यक्षेत्रे महता आयासेन निष्ठया साकं वयमपि जागरूका भवामः। यदा गृहस्थो जागरूको भवति, तदा चौरः प्रवेष्टुं न शक्नोति इति सर्वे जानन्ति। अर्थात् राष्ट्रस्य अपकारजनकं किमपि तत्त्वं सहसा हानिं जनयितुं न समर्थो भवतीति भावः। एतत् स्पष्टं प्रतिभाति यत् राष्ट्ररक्षार्थम् अहर्निशं सीमासु सैनिकाः स्थापनीयाः । सैन्यबलं सप्ताङ्गेषु एकतमं श्रूयते । यथा

**स्वाम्यमात्यसुहृत् कोशराष्ट्रदुर्गबलानि च।**
**सप्तांगमुच्यते राज्यं तत्र मूर्धा नृपः स्मृतः ॥( शुक्रनीतौ, 1.61 )**

साम्प्रतम् अस्माकं देशस्य सीमासु सीमासुरक्षाबलम् (SSB), बोर्ड सिकउरिटि फोर्स (BSF), भारत-तिव्वतीय सीमा सुरक्षाबलम् (ITPB) प्रभृति सुरक्षाबलानि सततं सजवञ्च प्रवर्तन्ते । ते सैनिका निरन्तरं जागरूकाः, अतः वयं सुरक्षिताः, ते शत्रून् निःसारयन्ति, अस्माकं रक्षां कुर्वन्ति-

**व्यास्थन्मृधो अभयं ते अभूत् - (अथर्ववेदे १३.१.५ )**

राष्ट्रस्य निमित्तं राजा जागुरूको भवेदिति अथर्ववेदः प्रमाणम्

**विशि राष्ट्र जागृहि रोहितस्य। (१३.१.९)**

यजुर्वेदस्य निम्नोक्त मन्त्र (22.22) एव राष्ट्रभावनानिमित्तम् अतीव रमणीयोदाहरणं भवति-

आ ब्रह्मन् बह्मणो ब्रह्मवर्चसती जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधि महारथो जायतां दोग्ध्री धेनुर्वोढ़ानड्वानाशुः सप्तिः पुरन्ध्रिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जनो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥

अस्माकं राष्ट्रे ज्ञानस्य दातारः सन्धातारः ब्राह्मणाः ब्रहमवर्चस्व सम्पन्नाः सन्तु । तदानीं ज्ञानस्य विकासो भवति । कोऽपि जनः स्वकीय राष्ट्रस्य अधोन्नतिं न कामयते । एतत् ऋग्वेदे भणितं-

**कञ्चन प्रियं न मिनन्ति राष्ट्रम्। (५.८२.२ )**

राष्ट्रस्य कल्याणनिमित्तं राजा जागरूको भवेदिति अथर्वश्रुतिः

**विशि राष्ट्रे जागृहि रोहितस्य। (१३.१.९)**

राष्ट्रस्यरक्षकाः शूराः वीरा अस्त्र-शस्त्रविद्याधराः, शत्रुनाशकास्तथा महारथिनो भवेयुः, महारथिनो विजयिनो भवन्तु इति प्रार्थना शजिष्णू रथेष्ठाःश इत्यंशेन मन्त्रेण (यजुर्वेदस्य 22.22 मन्त्रस्य) । अस्मिन् अंशे राष्ट्रस्य सुरक्षानिमित्तम् आवाहनं श्रूयते पुरन्ध्रिर्योषा इति मन्त्रांशेन निवेदनं क्रियते यत् अस्माकं सर्वा नार्यः सर्वा महिलाः कुटुम्बपालने कृतदक्षा भवेयुः। अस्माकं देशे महिलाः गृहलक्ष्मीरूपेणाभिहिताः पूज्याः। लक्ष्मीः अन्नदात्री भवति । गृहिणी गृहमुच्यते इति महाभारतस्य शान्तिपर्वणि भीष्मेणाभिहितम्। सम्यक् कुटुम्बपालनेन परिवारस्य श्रीबृद्धिर्भवति, साफल्यञ्च भवति। अन्नगतप्राणा इति विश्रुतवचनं सर्वैर्ज्ञायत एव। अन्नेन जातानि जीवन्ति इति महारानायणोपनिषद्। अन्नेन शरीरस्य पोषणं भवति । अन्नम् उत्पाद्यते पृथिवीतले अतः पृथिवी माता एव -

**भूमिर्माता (अथर्ववेदे ६.१२०.२)**
**उष्ट्रो न पीपरो मृधः- (ऋग्वेदे ९.१३८.२ )**

यथा माता स्वकीयदुग्धेन शिशुं पोषयति तथैव माता पृथिवी अस्मान् शस्यप्रदानेन पोषयति पालयति।

**माता भूमिः पुत्रो अहं पृथिव्याः । (अथर्ववेदे १२.१.१२)**

इति भूमिसूक्तस्य मन्त्रः स्मरणयोग्यः । यजुर्वेदे अपि

नमो मात्रे पृथिव्यै (9.22) इति ऋषेः उद्घोषः । इयं पृथिवी सर्वेषामपि प्राणिनां पालनं करोति । उक्तं हि-

**विश्वस्य भुवनस्य धर्त्री। (यजुवेदे १३.१८)**

यजुर्वेदस्य 22.22 संख्यके मन्त्रे 'फलवत्यो न ओषधयः'-इति पठ्यते। चर्व्य - चोष्य - लेहयं पेयमिति चतुर्विधम् अन्नम् आवश्यकम्। विभिन्नेभ्यः फलेभ्यः ओषधेभ्यश्च साम्प्रतम् एतत् चतुर्विधम् अन्नं प्रस्तूयते। अस्माकं जीवनयात्रायां प्रायः सर्वविधं वस्तु फलेभ्य उत वा ओषधिभ्यः मिलति । गृहस्थिजनानां पालनीयाः आचरणीयाः भवन्ति पञ्चमहायज्ञाः।

**अर्चत प्रार्थता नरः प्रियमेधासो अर्चत।**
**अर्चन्तु पुत्रका उत पुरभिद् घृष्णवर्चत। (सामवेदे ४.२.३.३ )**

पञ्चमहायज्ञपालन समग्रे भारतराष्ट्रे कर्त्तव्यरूपेण पाल्यते । पञ्चमहायज्ञपालननिमित्तमपि फलमाध्यमेन ओषधिभ्यश्च सुसम्पन्नं भवति, अत्र नास्ति सन्देहलेशः । फलानाम् ओषधीनाञ्च विकासनिमित्तं जलमावश्यकम्। जलं वस्तुतः मेषैः वृष्टिद्वारा दीयते । पर्जन्यादन्नसम्भवः इति गीतायाम्। स्वाभाविकजलं वृष्टिकारणात् सम्भवति। एतत् सत्यं यत् कृत्रिमजलसिञ्चनेन यत् यत् वस्तु शस्यानां कृते मिलति, वृष्टिजलेन ततोऽधिकम् पोषकं त्त्वं मिलति। अतः काले यथा समयं वृष्टिः आवश्यकी। एतदथम् ऋषेः प्रार्थना- 'काले वर्षतु पर्जन्यः' यथा पृथिवी शस्यपूर्णा स्यात् । 'Rain rain go away' इति मतिः पाश्चात्यानाम् । ऋषीणाम् आदर्श एतत् आदरणीयं नास्ति। ऋषेराग्रहो यन्मातुः पृथिव्याः कृपादृष्टिः अस्माकमुपरि सदा स्यात् । खेदस्य विषयो यन् मनुष्यकृत अपकर्म कुकर्मकारणात् साम्प्रतं माता पृथिवी रुष्टा, अतः सर्वत्र दरीदृश्यते प्रकृतेः भिन्नभिन्नरूपम् - कुत्रचित् अनावृष्टिः, कुत्रचिद्वा अतिवृष्टिः, कुत्रचित् मेघस्फोटः, कुत्रचित् भूकम्पः, कुत्रचित् वनाग्निः । एवं माता प्रकृतिः प्रकूपिता जायते । यथा माता अस्माकमुपरि न रुष्टा स्यात् तदर्थं यजुर्वेदस्योक्तिः अतीव प्रासङ्गिकी

**वयं स्याम सुमतौ पृथिव्याः । (१२.२१ )**

योगः क्षेमश्च इति पदद्वयं विशिष्टतां लभते । अत्र प्रसङ्गे अप्राप्तस्य प्राप्तिर्नाम योगः, तथा प्राप्तस्य रक्षणं नाम क्षेमः । इष्टलाभार्थम् अस्माकं प्रेरणा स्यात् प्रयन्तः करणीयः । तथैव प्राप्तस्य रक्षणं वर्धनमपि करणीयम् । योगप्रसङ्गे अयं मन्त्रांशः स्पष्टः-

**राष्ट्रं च रोह द्रविणं च रोह। (अथर्वश्रुतिः १३.१.३४)**

राज्ञः कर्त्तव्यविषये कामन्दकीयनीतिसारे प्रथमाध्याये योगक्षेमौ सन्निहितौ यथा

**न्यायेनार्जनमर्थस्य रक्षणं वर्धनं तथा ।**
**सत्पात्रप्रतिपत्तिश्च राजवृत्तं चतुर्विधम् ॥**

राज्ञां कर्त्तव्यत्वेन यत् विधानं प्रदीयते, तदर्थमपि भूमिरेव प्रधानम्। यदा एतेषां चतुर्णा यथायथपालनं सम्भवति, तदा स राजा सर्वजनैर्वन्द्यः भवति । एतदेव उच्यते यथा सुकर्माणः सुरुचः। (अथर्ववेदे 18.3.22 ) भूमिं विहाय किमपि न सिद्ध्यति । इदं राष्ट्रं पिपृहि सौभगाय (अथर्थवेद 7.35.1 ) - इति मन्त्रे राष्ट्रस्योन्नतिः प्रार्थ्यते । एषा पृथिवी अस्माकं कृते सुखप्रसविनी भवतु इति प्रार्थना यजुर्वेदे श्रूयते -

**यच्छा नः शर्म सप्रथाः (३५.२१, ३६.१३)**
**स्योना पृथिवि नो भव (३५.२१; ३६.१३)**

स्योना पृथिवीति मन्त्रः पूजासमये घटस्थापनवेलायां सादरमुच्चार्यते । अथर्ववेदे राज्ञा शासितराष्ट्रं काम्यते स नो रास्व राष्ट्रमिन्द्रजूतम् (अथर्ववेदे 6.39.2)। अथर्वश्रुतौ पुनश्च कल्पते

राष्ट्रस्योन्नतिः । यथा मद्राहमस्मै

प्रायाच्छन् इदं राष्ट्रमसादिति (6.128.1)। तदर्थं सर्वे देवा- प्रार्थ्यन्ते यथा ते कल्याणकारिणो भावन्तु इति

**स त्वा राष्ट्राय सुभृतं बिभर्तु (अथर्ववेद १३.१.१ )**

चर्चातिः स्पष्टं भवति यत् राष्ट्रपदस्य प्रयोगः वेदकालिक एव। राष्ट्रस्योन्नतिनिमित्तं तदानीमेव अस्मदीयो मन्दार ऋषयः पथिकृतः सततं लग्ना आसन्। वयं तान् शिरसा नमामः 'इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः' (अथर्ववेदे 18.2.2)। ते ऋषयः मातृभूमिनिमित्तं राष्ट्रनिमित्तं वा आवाहनं कुर्वन्ति यथा वयं सर्व यत्नशीला भवेम इति।

**व्यचिष्ठे बहुपाव्ये यतेमहि स्वराज्ये (ऋग्वेदे ५.६१.६ )**

अयं भावः देशभक्तेः सर्वोकृष्टनिदर्शनम् यत् राष्ट्रस्य सुरक्षानिमित्तमपि यतमाना भवेम इति भावः स्पष्टः।

दुर्लभं भारते वर्षे जन्म तस्मान्मनुष्यता।

मानुषे दुर्लभ चापि स्व-स्वधर्मे प्रवर्त्तिता (पद्मपुराण 80.8)। किमधिकमिति अलं विस्तरण ॥

लब्ध साहित्यपरितोषिकः।

साभारः सुधीवैभवम्

# श्रीमद्भगवद्गीतोक्ता दैवीसम्पत्

प्रो. सुरेन्द्रकुमारः
संस्कृतविभागः,
महर्षि दयानन्दविश्वविद्यालय, रोहतकम्

शतसाहस्र्ययां गीतासु नैकासु गीतासु श्रीमद्भगवद्गीता मूलतो नीतिशास्त्रस्य ग्रन्थोऽस्ति । कर्तव्यविमुखमर्जुनं स्वकर्मणि नियोजयितुं योगेश्वरेण श्रीमता कृष्णेनोपदिष्टां नीतिमेव महर्षिवेदव्यासो गीतारूपेण प्रोक्तवान्। अधर्मे विरतिर्धर्मे च रतिरेव नीतिशास्त्रस्य लक्ष्यं भवति।

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन।।
क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप।।[1]

गीताया उक्तवचनेष्वधर्मान्निवृत्तिर्धर्मे च प्रवृत्तिरेवोपदिष्टा। सम्पूर्णायामपि गीतायामौचित्यस्य विधानमनौचित्यस्य चाप्रतिषेधैव दरीदृश्यते। अनृते अश्रद्धा सत्ये च श्रद्धेयमेवास्ति सनातनी वैदिकपरम्परा[2] अस्याः परम्पराया गीतायामपि प्रामुख्येन निर्वाहः। तत्र षोडशेऽध्याये द्विविध भूतसर्गस्य वर्णनेनापि देवादिवद् वर्तितव्यं नासुरादिवदिति प्रवृत्तिनिवृत्तिपर एवोपदेशः।

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च।[3] सामान्यतो भूतसर्ग इति पदेन निखिलोऽपि प्राणिसर्गोऽवबुध्यते तथाप्यत्र पदेनानेन महर्षिः मानवीयं सर्गमेवोक्तवान्। यतो हि समग्रेऽपि भूतसर्गे देवत्वमसुरत्वं च मनुष्येष्वेव भवितुं शक्नुतः । अतएव पदमिदं व्याख्यायन्नेवं लिखितवानाचार्यशंकरः- "द्वौ द्विसंख्याकौ भूतसर्गौ भूतानां मनुष्याणां सर्गौ सृष्टि ।[4] वस्तुतो मनुष्येष्वेव तादृक् सामर्थ्यं यत्ते देवत्वमधिगन्तुं शक्नुवन्त्यसुरत्वमपि च। देवत्वमधिगतवतां मनुष्याणामयं दैवसर्गः कथामिति जिज्ञासायां तत्र दैवीसम्पदुपदिष्टा योगेश्वरेण श्रीकृष्णेन-

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।।
अहिंसासत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दयाभूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्।।
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता
भवन्ति सम्पदं दैवीमभिजातस्य भारत ।।"[5]

निर्दिष्टेषु पद्येषु दैवीं सम्पदमाप्तवप्तां मनुष्याणां षड्विंशगुणोपेताया अस्या दैव्याः सम्पदो विषयोऽस्मिन् पत्रे प्रस्तूयते।

अभयम्-अनिष्टाशङ्कया प्राणिनां मनोऽनवस्थितिरेव भीतिः। भीतिरेव भयम्। भयम्। भयस्य सर्वथा अभाव एवाभयम्। मानवीयसंवदेनेषु भयमन्यतमं संवेदनम्।[6] रागो द्वेषश्च मोहश्चेदं दोषैरस्य भयस्य कारणम्। तत्रापि रागो भयस्य प्रमुख कारणम्। आसक्तिलक्षणो रागो भूतेषु बहुविध भयमुत्पादयति। यत्र रागस्तत्रैव भयम्। यथोपदिशति भर्तृहरिः-

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालयाद् भयम्।
मौने दैन्यभयं बले रिपुभयं रूपे जराया भयम्।
शास्त्रे वादभयं गुणे खलभयं काये कृतान्ताद् भयम्।
सर्वं वस्तु भयावहं भुवि नृणां वैराग्यमेवाभयम्।।7

वर्णनेनानेनेदमवबध्यते यद् राग एव भयस्य प्रमुखो हेतरस्ति। कुरुक्षेत्रस्य महासमरे स्वजनेष्वनुरागादेवार्जुनो भीतोऽस्ति। अर्जुनस्यास्य भयस्य नाशायैव योगेश्वर-कृष्णस्यायं एवंविदमभयं देवीषु सम्पत्सु प्रथमा सम्पदस्ति। सत्त्वसंशुद्धिः- सत्त्वस्य अन्तःकरणस्य संशुद्धिय सत्त्वसंशुद्धिः। सत्त्वस्य प्रकाशकस्य परमार्थज्ञान हेतोः शुद्धिः रजस्तमोभ्यां विमुक्तिरिति सत्त्वसंशुद्धिरिति वस्तुतः सत्त्वगुणोद्रेकादेव अन्तकरणस्य संशुद्धिर्भवति अतो नात्रोभयविधनिर्वचनयोः किमपि वैषम्यए। अचार्यशङ्करमते तु संव्यवहारेषु परवञ्चन-मायानृताधि परिवर्तनं शुद्धसत्त्वभावेन व्यवहार इत्यर्थः।[8] यदा रजस्तमस्यभिभूय सत्त्वं वर्धते तदेदम् अन्तःकरणे ज्ञानसुखादीन् आरभते । यथोक्तं श्रीमद्भवद्गीतायाम-

सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते।
ज्ञानं यदा तदा विद्याद विवृद्धं सत्त्वमित्युत ।।[9]

एवं विवृद्धे सत्त्वे ज्ञानाख्यः प्रकाश उपजायते। अथ च प्रकाशपूरितेऽन्तःकरणे परवञ्चनमायानृतादेः परिवर्जनात् सत्त्वसंशुद्धिरूपा द्वितीया सम्पदापद्यते। ज्ञानयोगव्यवस्थितिः- ज्ञानं च योगश्च इति ज्ञानयोगौ तयोः व्यवस्थितिः । द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते इति नियमेनात्राथों भविष्यति ज्ञाने योगे च व्यवस्थितिः। केषाञ्चिद् विदुषां मते "ज्ञानाय योगे व्यवस्थितिरित्यभिप्रायोऽस्य पदस्य"[10] परमसमीचीनमिदं प्रतीयते । शङ्कराचार्योऽपि पूर्वोक्तविग्रहानुसारमेवार्थ विदधाति । यथा- "ज्ञानं शास्त्रतश्चार्यतश्चात्मादिपदार्थानामवगमः, अवगतानामिन्द्रियाद्युपसंगारेणैकाग्रत्या स्वात्मसंवेद्यतापादनं योगः, तयोर्ज्ञानयोगयोर्व्यवस्थितिर्व्यवस्थानं तन्निष्ठता।"[11] गीतास्वध्यायप्रसङ्ग जिज्ञासेयं समुदेति यज्ज्ञानं साध्यमुत साधनम् ? ज्ञानयोगव्यवस्थितिरित्यस्मिन् पदे ज्ञानं साधनत्वेन दृश्यते, पुनः- "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।"[12] अत्र ज्ञानं साध्यत्वेन प्रतीयते । इदमत्रावधेयं यद्गीतायां ज्ञानं साध्यत्वेन साधनत्वेनापि च वर्णितमस्ति। यत्र ज्ञानं साध्यं तत्र योगसंसिद्धिः साध नम्। तज्ज्ञानं लब्ध्वा ज्ञाता परां शान्तिमधिगच्छति। यत्र ज्ञानं साधनं तत्र योगव्यवस्थितिः साध्यम्। इत्थं प्रतीयते यद् योगव्यवस्थितेः साधनं ज्ञानं सदसत्पदार्थबोधात्मकम्, योगसंसिद्धेश्च, साध्यं ज्ञानमात्मसाक्षात्कारात्मकमिति। क्रमः- ज्ञानम् (सदसत्पदार्थात्मकम्)-योगव्यवस्थितिः- योगसंसिद्धिः- ज्ञानम् (आत्मसाक्षात्कारात्मकम्)। शङ्काराचार्य मते एषा प्रधाना दैवी सात्त्विकी सम्पत्।[13] दानम्-अन्नवस्त्रौषध्यादीनां यथाशक्ति प्रदानं दानमिति कथ्यते। यथाशक्ति संविभागः अन्नादीनामित्याचार्यशङ्करः।[14] गीतायां सात्त्विक, राजस्व तामसञ्चेति वान त्रिविधमिति उक्तम्। यथा

1) दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्।।
2) यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्।।
3)अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।
असत्कृमवज्ञातं तत्तामसमुदाहृतम् ।।[15]

वैदिकसंस्कृतौ दानस्य बहु माहात्म्यं दृश्यते । तैत्तिरीयापषनिषदि श्रद्धया अश्रद्धया हिया, भिया संविदा च दातव्यमस्तीत्युपदिष्टम्।"[16] एतस्मात् कारणादेव गीताकारोऽपि दानप्रसङ्गे तामसं दानमपि स्वीकरोति परन्तु दैवीसम्पद्रूपे उल्लिखितं दानं तु सात्त्विकमेव। यतो हि-

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह।।[17]

वस्तुतो दैवीसम्पद्रूपस्य सात्त्विकदानस्यैव तन्माहात्म्यं यस्मान्महात्म्नां किमप्यदेयं न भवति । कर्णस्त्वचः शिविर्मांसं जीवं जीमूतवाहनः । ददौ दधीचिरस्थीनि नास्त्यदेयं महात्मनाम्।।[18]

दमः- चक्षुरादीनां बाह्यकरणानामुपशम एव दमः । कथञ्चायमुपशम इति जिज्ञासायामुच्यते- "बाह्येन्द्रियाणां श्रवणादिव्यतिरिक्तविषयेभ्यो निवर्तनम्।"[19] इन्द्रियसंयमान्नरो देवत्वमधिगच्छति ।

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः।।
तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता[20]

यज्ञः- वैदिकसंस्कृतौ यज्ञशब्दो व्यापकमर्थमावहति। प्रत्येकं शुभकर्म यज्ञपदस्य वाच्यत्वेनावबुध्यते। गीतायां यज्ञस्य बहुविधं रूपं दृश्यते । यथा द्रव्ययज्ञः, तपो यज्ञः, स्वाध्याययज्ञः ज्ञानयज्ञश्चेति ।[21] गीतायामुदिष्टेषु विविधेषु यज्ञेषु ज्ञानयज्ञ एव श्रेष्ठः । यतो हि सर्वेषामपि कर्मणां परिसमाप्तिर्ज्ञाने भवति ।

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तपः।
सर्वं कर्मखिलं पार्थ ज्ञाने परिसमाप्यते।।
यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ।।[22]

यथा-

1) अफलाकांक्षिभिर्यज्ञो विधिदृष्टो च इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः।।
2) अधिसन्धाय तु फलं दम्भार्थमपि चौव यत्।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ।।
3) विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ।।"[23]

नवृष्ट्या सर्वेऽपि सात्त्विकाः प्रतीयते यद् गीतायां यज्ञानां वर्गीकरणे यद्दैविध्यमुपलभ्यते तत्र प्रथमं वर्गीकरणं साध्यसाध दैवीसम्पद्रूपा भवन्ति।

स्वाध्यायः- स्वस्य अध्यायः (अध्ययनम्) स्वाध्यायः ।[24] वैदानामध्ययनमपि स्वाध्यायः । वस्तुतः को वारिणा किल्लेदेव मादी वात्यविषयकानां प्रस्थानामध्यनमेव स्वाध्यायो गीतायां स्वाध्याचे कोऽहमस्मि। किञ्देदं जगत्? अनेन जगता सह को मे सम्बन्धः? किञ्चात्र मम प्रयोजनमित्यादीका वाङ्मयस्य तपसो लक्षणेषु परिगण्यते।[26]

तपः- सामान्यतः शीतोष्णादि द्वन्द्वानां सहनं तप उच्यते। परन्तु गीतायां तपसो यत् सूक्ष्मतयं वर्णनमुपलभ्यते तेन तपसो माहात्म्यं वरीवर्ति। शरीरादिभेदेन तत्तपो त्रिविधिमित्युक्तम्।

1) देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ।।
2) अनुवेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसन चौव वाङ्मयं तप उच्यते ।।
मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
3) भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ।।[27]

तदेतत्त्रिविधिमपि तपः सत्त्वादिभेदेन सात्त्विकं, राजसं तामसमपि च भवति ।[28] एवं सात्त्विकं शारीरं, सात्त्विकं वाङ्मयमित्यादिप्रकल्पनया तपो नवविधं भवितुमर्हति।

आर्जवम्- ऋजुत्वं सर्वदा।[29] ऋजुत्वेन सम्पन्नो मनुष्यो देवत्वमधि गच्छति । आर्जवं कुटिलेषु न नीतिरिवं वचनं तु रजोऽभिभूतानां राज्ञां कृते वर्तते । सत्त्वाभिभूतानां ब्रह्मणि रतानां कृते तु स्वभावजमेवास्त्यार्जवम्

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ।।[30]

अहिंसा- प्राणिनामपीडनमेवाहिंसा । सिद्धायामहिंसायां सर्वप्राणिनां वैरत्यागो भवति ।[31]

सत्यम्- अप्रियानृतवर्जितं यथाभूतार्थवचनम।[32] सत्ये संसिद्धे सति वाण्यमोधा भवति।[33] त्यागः- कर्म फलेच्छाविरहः। त्यागः संन्यासः।[34] वस्तुतः कर्मफलच्छानां सम्यक् न्यासादेव संन्यास एव त्यागः। गीतायां त्यागोऽयं त्रिविध इत्युक्तः। त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः।[35] 35 सात्त्विको राजसस्तामसश्चेति।

1) कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चौव स त्यागः सात्त्विको मतः।
2) दुःखमित्येव यत्कर्म कायक्लेशभयात्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्।।
3) नियतस्य तु संन्यासः कर्मणो नोपपद्यते।
मोहात्तस्य परत्यागस्तामसः परिकीर्तितः ।।[36]

शान्तिः- गीतायां शान्तिपदस्य मोक्ष इति वाच्योऽपि उपलभ्यते ।[37] परन्त्वत्र अन्तःकरणस्य उपशम एव शान्तिः।[38] अन्तकरणस्य अर्थात् मनसः श्रवणादिव्यतिरिक्तविषयेभ्यो निग्रह एव शमः शान्तिर्वा निगद्यते।[39] अपैशुनम्- परस्मै परदोषाविष्करणं पैशुनं पिशुनता वा । पैशुनस्याभावोऽपैशुनमिति। वस्तुतः पैशुन्यं खलानामभिलक्षणम्। यतो हि खलाः सर्षपमात्राण्यपि परछिद्राणि पश्यन्ति पुनरात्मनो बिल्वमात्राण्यपि पश्यन्तोऽपि न पश्यन्ति । दया- दुःखितेषु भूतेषु कृपा । दुःखिनं प्राणिनं वीक्ष्य तदुःखं निवारयितुं हृदये कोऽप्यपूर्वो भावः। अनया सम्पदा सम्पन्नो नरः परदुःखकातरो भवति।

अलोलुप्त्वम्- विषयसंनिधाविन्द्रियाणां विक्रिया एव लोलुप्त्वम्। तद्भावोऽलोलुप्त्वम्। विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव अलोलुप्त्वसम्पन्ना धीरा भवन्ति । मार्दवम्- मृदुता, सरलता, सौम्यता अन्तःकरणस्य । शरीरप्राधान्यादार्जवमन्तःकरणप्राधान्याच्च मार्दवमित्युभयोः विशेषः। 41

ह्वीः- ह्रीरिति लज्जा। शास्त्रं लोकं वातिक्रम्य कार्यकरणे यःसङ्कोचः सैव ह्रीः । ह्रियासम्पन्नो नरो न कदापि शास्त्रमर्यादां लोकमर्यादां वातिक्रामति। अचापलम्- असति प्रयोजने वाक्पाणिपादादीनामव्यापरयितृत्वम्[42] वाक्पाणिपादादीनामन्यथा व्यापारो मनोऽनवस्थितेः कार्यम्। अतः-

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।
ततस्ततो नियम्यैदात्मन्येव वशं नयेत्।।[43]

तेजः- सामान्यतः तेजः पदस्य वाच्यार्थो दीप्तिरिति भवत्यतस्त्वग्गता दीप्तिरपि तेजः पदेनाभिधीयते परन्तु शंकरमते त त्वग्गतदीप्तिरत्र तेजः पदस्य वाच्यमपितुः। प्रागल्भ्यम्। येन परे नाभिभवेयुस्तादृक् प्रागल्भ्यं, तादृशी प्रतिभा तादृशः प्रभावो वा तेजः।

प्रागल्भ्यहीनस्य नरस्य विद्याशस्त्रं यथा कापुरुषस्य हस्ते।।[44]

क्षमाः- सत्यपि प्रतीकारसामर्थ्यं परापराधसहनमेव क्षमा। क्षमाया अक्रोधस्य च विशेषमुपवर्णयन्नेवं लिखत्याचार्यशङ्करः-"क्षमा आकुष्टस्य ताडितस्य वा अन्तर्विक्रियानुत्पत्तिः, उत्पन्नायां विक्रियायामुपशमनम् अक्रोध इति।[45]

धृतिः- देहेन्द्रियेषु अवसादं प्राप्तेषु तस्य प्रतिषेधकोऽन्तःकरणवृत्तिविशेषः, येनोत्तम्भतानि करणानि देहश्च नावसीदन्ति ।[46] वस्तुतो धृतिरन्तकरणस्य साऽवस्था यत्र विकारहेतौ सत्यपि अन्तःकरणं न विक्रियते। सम्पत्तौ च विपत्तौ च महतामेकरूपता। विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः। सत्त्वगुणादिप्रभावेनेयं धृतिस्त्रिविधा।

1) धृत्या यया धारयते मनः प्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी।।
2) यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन ।
प्रसङ्गेन फलाकांक्षी धृतिः सा पार्थ राजसी ।।
3) यया स्वप्नं भयं शोकं विषादं मदमेव च।
न विमुञ्चति दुर्मेधा धृतिः सा तापसी मता ।।[47]

शौचम्- नैर्मल्यम्। बाह्याभ्यन्तरभेदेन शौचमिदं द्विविधम्। शरीरशौच वाक्शौचमर्थशौचमित्यादिभेदेन बहुविधम् । आन्तरं शौचमपि मनोबुद्ध्योर्भेदेन द्विविधम्। अद्रोहः- परामविकी बोवाकिया क्रोधः। अपकारिण: अवश्यमेवानिष्टं करिष्यामीति वैरभावना दो द्रोहयोरयं विशेषो यदपकारिणं प्रति समुद्भूता नातिमानिता- अत्यर्थ मानोऽतिमानः, स यस्य विद्यते स अतिमानी तद्भावोऽतिमानिता तदभावा नातिमानिता। आत्मनः पूज्यतातिशयभावनाभाव इत्यर्थः।[48]

निर्दिष्टया दैव्या सम्पदा सम्पन्नो भूतसर्ग एवास्मिन् लोकेऽभ्युदयं निश्रेयसञ्चाधिगन्तुं शक्नोति नान्यथा। नान्यः पन्था विद्यतेऽनाय । यतो हि दैवीसम्पद्विमोक्षाय निबन्धायासुरी मता।[49]

शेषभागःसप्तमपुटे

# पारिभाषिक-शब्दैश्च शास्त्ररक्षोपि सम्भवेत्



प्रो. बनमाली बिश्वाल:

न ज्ञानं वर्तते लोके यच्छब्देन न भासते।
शब्दमयोस्ति संसारः शब्दं विना गतिः कुतः।।
संज्ञां विना च शब्दानाम् अर्थबोधो न जायते।
सीमोस्ति यदि शब्दार्थे स शब्दः पारिभाषिकः।।
यदा सामान्य-शब्दानाम् अर्थो रुढो भवेत् क्वचित्।
तदा सामान्य-शब्दाश्च भवन्ति पारिभाषिकाः।।
पारिभाषिक-शब्दाश्च न सामान्याः कदाचन।
तेषां विषय-विशेषे प्रयोगो भवति यतः।।
एते शब्दाः जहत्स्वार्थाः स्वार्थं त्यजन्ति सर्वथा।
अजहत्स्वार्थसम्पन्नाः विशेषार्थान् ददत्यपि।।
उभयथा स्वरूपं च भवत्यपि कदाचन।
जहदजहदाख्या च तेषां कृतेपि युज्यते।।
व्याकरणे समासार्था विशिष्टशक्तिबोधकाः।
तथैवात्र भवन्त्येते शब्दाश्च पारिभाषिकाः।।
क्षेत्रे क्षेत्रे च शब्दानां पदार्थो भिद्यते यतः।
तेषां किमस्ति तात्पर्यं ज्ञातव्यमस्ति सर्वथा।।
पारिभाषिक-शब्दा ये सन्ति संस्कृत-वांमये।
विषयानुगुणं तेषां विधीयते विभाजनम्।
केचिद्विविधशास्त्रीयाः शास्त्रपरम्परायुताः।
न्यायव्याकरणाभ्यां च काव्यशास्त्रपरायणाः।।
एवं वैज्ञानिकाशब्दा शास्त्रेषु संस्कृतस्य वै।
ज्ञाते सति च तात्पर्ये व्यवहारोपि सम्भवेत्।।
तात्पर्यनिर्णये शास्त्रे निर्दिष्टास्सप्तहेतवः।
सुष्ठुज्ञानेन येषान्तु तात्पर्यं ज्ञायते ध्रुवम्।।
पारिभाषिक-शब्दैश्च शास्त्ररक्षोपि सम्भवेत्।
यत्र स्वल्पेन शब्देन बह्वर्थः प्रतिपाद्यते।।
पारिभाषिक-शब्दाश्च लोककल्याणकारकाः।
समाजस्योपकाराय तत्प्रयोगो भवेत् सदा।।
आधुनिकेषु भाषासु शब्दाभावश्च दृश्यते।
नूनं संस्कृतभाषात्र भविष्यति सहायिका।।
कौटिल्येनार्थशास्त्रे च शब्दाश्च पारिभाषिकाः।
प्रयुक्तास्ते हि चाद्यापि प्रासंगिकाश्च सर्वथा।।
अभिलेखप्रसंगेषु तथा लेखप्रसंगतः।
प्रयुक्ता बहवश्शब्दा तेनैव पारिभाषिकाः।।
वैयक्तिका लैखास्सन्तु लेखा वा राजपत्रिताः।
नूत्नास्सर्वप्रसंगेषु शब्दाः क्वचिद् विनिर्मिताः।।
अत्रैव लेखसम्पच्च पदमेतत् प्रयुज्यते।
उत्कृष्टलेखवाच्यत्वात्तस्यार्थः पारिभाषिकः।।
लेखोत्कृष्टगुणा नैके तत्रैव प्रतिपादिताः।
लेखप्रयोजनं चात्र सलक्षणं हि वर्णितम्।।
लेखदोषाश्च तत्रैव सन्त्यपि प्रतिपादिताः।
तत्र शासनपत्रस्य स्वरूपमपि चर्चितम्।।
शासनलेखकस्यापि लक्षणं वै विचारितम्।
शब्दाश्शताधिकास्तत्र प्रयुक्ताः पारिभाषिकाः।।

# वसन्तो वर्तते पूज्यः

-महेशनारायणशास्त्री
'कुरेड़ा, टोङ्क,
राजस्थानम्'

अहो! कुसुमाकरो नव्यः,
ऋतूणामागतो भव्यः।

भृङ्गाणां राजते निवहः,
सुमेषु मधु पिबन्मधुरः।
वसन्तो दृश्यते रम्यः,
अहो! कुसुमाकरो .......

नीयते पुष्पजो गन्धो
वायुना सर्वतो बन्धो!
वसन्तो नासिकापेयः।
अहो! कुसुमाकरो .......

कोकिलो मधुरवं कुरुते,
समाश्रित्याम्रनगशाखां,
वसन्तो वर्तते श्रव्यः।
अहो! कुसुमाकरो .......

केदारस्सस्यसम्भरितः,
पुष्पपत्रैस्समं हरितः,
वसन्तो राजते हृष्यः।
अहो! कुसुमाकरो .......

केकया केकी वितनोति,
सुशोभामृतुगणेशस्य,
वसन्तो वर्तते शोभ्यः,
अहो! कुसुमाकरो .......

नन्दति जनगणस्सकलः,
प्रपीय सुरभिजां शोभां,
वसन्तो वर्तते हृद्यः।
अहो! कुसुमाकरो .......

ऋत्वेश! कोकिलमित्र!
कुर्वे ते स्वागतं भद्र!
वसन्तो नित्यमभिनन्द्यः।
अहो! कुसुमाकरो .......

सुमतिदां शारदां वरदां,
पूजये ज्ञानदामम्बां,
वसन्तो वर्तते पूज्यः।
अहो! कुसुमाकरो .......

# निष्क्रान्ता;सर्वे



डॉ. कौशल तिवारी

रात्रौ यदा
शयनार्थमास्तरणं गच्छामि
शिरोधाम्नि तिष्ठन्ति
शाकुन्तलपात्राणि,
कण्वपुत्र्या हस्तसिंचितो वृक्षो भूत्वा
साक्षी भवामि
सौप्रस्थानिकक्षणाणाम्

प्रवृद्धरात्र्या सह
स्वकथां कथयन्ति
श्हेनरीश्कथाकारस्य कथापात्राणि
सजीवानि भूत्वा

'मंटोश्कथाकारस्य
टोबाटेकसिंह इव
निद्रायां जल्पामि
'ओपड दी गड़गड़ दी बेध्याना दी'

दूराद् धावित्वा
आगच्छति मत्गृहसमीपं
शकारव्याकुला वसन्तसेना
पूरयति या
पुत्रस्य मृच्छकटिकायां
स्वस्वर्णालंकारान्

प्रयोगधर्मी स नाट्यकारो
दर्शयति स्वनाटकानि
मुक्तरंगमंचे
निर्भीको भूत्वा

गहनरात्रौ
वाप्पा ब्रह्राक्षसस्
तीक्ष्णीकरोति स्वनखान्
मन्ये भेत्स्यति
ममास्तित्वस्य कृत्रिमकवचम्

तदा शबिज्जीश्कथाकारस्य कथा
लालयन्ति माम्
आशान्विता भूत्वा
गच्छामि भिन्नलोकम्

सहसा निष्क्रान्ताः सर्वे
रंगमंचं च
एकलं प्रेक्षकं मां च त्यक्त्वा
दर्शनार्थं
मायायाः क्रूरनाट्यम्

# ।। सीतात्यागव्यथा ।।



-पंकज कुमार झा
वैद्यनाथ धाम,
देवघरः,
झारखण्डः

को दोषो जननी तव प्रियवरेणात्मस्थितेनाऽभवत्
कारुण्याधिपतीश्वरेण जगतश्चारण्यके प्रेषिता।
माहात्म्यं बत दिक्षु विश्वविदितं हंहो कथं शोभते
शास्त्रेषु प्रथितं प्रमाणवचनं रामादिवत् वर्त्तनम् ।।1।।

शास्त्रं शासनमस्ति किन्तु कथय प्रज्वालिताग्नौ कथं
कृत्वा तत्र परीक्षणं तदपि नो विश्वाससंस्थापितः ।
आकाशात्पवनस्ततोऽग्निसरितः शुद्धस्सदा निर्मलः
तस्मान्निर्गतमैथिली भगवती, तस्यां भ्रमाविष्कृतः।। 2 ।।

वैदेही सुविदेहधर्त्री जगति प्राच्यर्पिता नु स्वयं
तुभ्यं सूर्यसुवंशिने कथमहो राज्ञा विदेहेन वै।
यावज्जीवितकष्टदानपरकं हित्वा न किञ्चित् खलु
दत्तं किन्त्वपरं सुखं कथयतात् यद्यस्ति रामो भवान् ।। 3 ।।

काको नीतसुकर्णकुण्डलमहो ब्रूते मुधा कश्चन
कर्णं पश्यतु नैव काकसमलं एषास्ति नीतिश्शुभा।
कस्याप्यज्ञजनस्य वाग्विवृतिभिर्धर्मः कथन्दोलितः
गर्भावस्थितमुञ्चनं कथमपि न्याय्यं न सम्भाव्यते।। 4 ।।

गत्वा पश्य वनं हि यत्र वसिता सीता किलैकाकिनी
अद्यापि व्यथितं मनो भवति वै साक्षात्कृते तद्वने।
यस्मिन्निर्जनता प्रकाशरहिता सीता न भीता क्वचित्
एषा निर्दयता विजातिसदृशा निन्द्या कथन्दर्शिता।। 5 ।।

# ।। राम रामेति।।



- पूजा कुमारी
वैद्यनाथ धाम देवघरः,
झारखण्डः

रामनामाश्रितो यो जनो भूतले
तस्य चान्यत्कथं वै भवेच्चिन्तनम् ।
सुस्थलं देहरम्यं शुभं मन्दिरं
यत्र रामो वसेत्तद्धि रामायणम् ।। १ ।।
वेदमातुस्सुतो निर्मलो भूमिपः
स्वस्थसम्भ्रान्तशेषाग्रजो धीवरः ।
मैथिलीचित्तचन्द्रस्य काशप्रियः
प्रार्थ्यतेऽसौ भवेन्मे हि रामान्वितः ।। २ ।।
सादरन्नौमि साकेतधामप्रियं
शंकराराधितं लोकसम्पूजितम् ।
भिन्नकाव्यादिगीते भृशं चर्चितं
सर्वदानन्दसन्दोहजं चन्द्रिम् ।। ३ ।।
प्रातरारभ्य सायांह्नकं मे त्वहो !
पूजनं रूपमस्तु प्रभोर्वन्दनम् ।
त्वत्प्रसादादिह प्राञ्जले भूस्थले
यत्करोमि प्रकृष्टं सुपुण्यार्जितम् ।। ४ ।।
यत्कृतं यत्स्मृतं तद्भवेत्तेऽर्पितं
नास्ति गेहे मदीये प्रभूतं धनम् ।
मन्मनस्त्वत्पदाम्बिद्रयं संस्मरेत्
राम रामेति वाण्यास्सदा निःसरेत् ।। ५ ।।

# ।।समस्यापूर्तिः - राष्ट्रसेवापराङ्मुखः।।

-डा० सिंहासन पाण्डेयः
देवरियातः

1. शाश्वतीमार्यमर्यादां
मनुप्रवर्तितां शुभाम् -
विगायन् मानवो योऽसौ
राष्ट्रसेवापराङ्मुखः ।।
2. श्रीरामस्य सदाचारं
धर्मादर्शं वचस्तथा
सर्वं यस्तु विरुन्धानो
राष्ट्रसेवापराङ्मुखः।।
3. उषित्वा भारते नित्यं
संस्कृतं संस्कृतिन्तथा
दुर्वृत्या चावमन्वानो
राष्ट्रसेवापराङ्मुखः ।।
4. गङ्गां गीतां च गायत्रीं
पुण्यां जन्मभुवंतथा
पितरौ भर्त्सयन्नूनं
राष्ट्रसेवापराङ्मुखः ।।
5.देशसीम्नि स्थितान् वीरान्
जागरूकान् दिवानिशं
सन्दिहानस्तु यः कोऽपि
राष्ट्रसेवापरामुङ्खः ।।
6.मातृभूमौ परां गर्हां
प्रत्यहं वितनोति यः,
प्रीणाति म्लेच्छवर्गेषु,
राष्ट्रसेवापरामुङ्खः।।
7.तुच्छस्वार्थवशीभूतो
मानवतां विदूषयन्
वर्धयत्यासुरीं वृत्तिं
राष्ट्रसेवापराङ्मुखः ।।
8.निजदेशे वसन् कोऽपि
वैरिदेशं तु वन्दते
देशद्रोहरतः कामं
राष्ट्रसेवापराङ्मुखः।।
9.दुर्मेधा : पूज्यते येन
सुमेधास्तु विनिन्द्यते
योग्यताबाधकोऽसौ तु
राष्ट्रसेवापराङ्मुखः।।
10. ज्येष्ठं पूज्यजनं मित्र ।
योऽवजानात्यकारणं
विद्वद्घात्यार्यलोकाय
राष्ट्रसेवापराङ्मुखः ।।
11. यस्य शिक्षा न लोकस्य
श्रेयसेप्रेयसेऽथवा
दम्भी शठः सदा प्रोक्तः
राष्ट्रसेवापराङ्मुखः।।

# अवधपते! जय जय श्रीराम



-डॉ.सर्वेश कुमार मिश्र
काशीकुंज जमुनीपुर
प्रयागराज 221505

जयतु जयतु हे केशव! राघव!
हे जयतु जयतु श्रीराम! ।
जयतु जयतु हे हनुमन्नायक!
हे जयतु जयतु श्रीधाम ।।1!!
जयतु जयतु दशग्रीवविनाशक !
हे जयतु जयतु श्रीराम!
जयतु जयतु हे शबरीतोषक !
मम हृदये वस श्रीराम ! ।।2।।
जयतु जयतु हे संकटमोचक!
सदा जयतु हे सीताराम !
जयतु जयतु लंकेशविदारक!
रघुकुलतारक! हे मणिधारक! ।।3।।
जयतु जयतु हे दशरथनंदन!
हे जयतु जयतु वसुधाम !
आगछत्विह धामनि राघव!
जयतु जयतु जगदीश्वर! माधव! ।।4।।
जयतु जयतु हे सीतावल्लभ!
हे वसतु भारते दर्शनदुर्लभ! ।
भजाम्यहं जय जय श्रीराम
जयतु जयतु हे राजन! राम!।।5।।
जयतु सदा सरयूजलमज्जक!
हे सज्जनपोषक! दुर्जनतर्जक!।
हे रामलला! हे सर्जक! पालक!
जयतु जयतु भवसागरतारक! ।।6।।
जय श्रीराम! जय श्रीराम!
अवधपते! जय जय श्रीराम! ।
जयतु जयतु जय सीताराम!
कण- कण- राम! जय श्रीराम!।।7।।
जय रोमे रोमे वासिन् राम !
खलमलनाशक! जय श्रीराम!।
कण- कणवासिन् जय श्रीराम।।
हे नयनाभिराम! जय सीताराम! ।।8।।
हे जनकजमातः भरतबंधु!
हे लखनतात! हे दीन - बंधु! ।
राजीवनयन! हे करुणानिधान!
मर्यादपुरुष! हे कृतविधान!।।9।।
जननीजनकबंधुसुतदारान्
तनुधनभवनमित्रपरिवारान्।
हुत्वा रामे विश्वममत्वं
हृदयेन जप त्वं रामं रामम् ।।10।।
हृदये करुणा व्याप्ता राम
किम् त्वं करुणारूपे राम।
नित्यं मुखं जपति श्रीराम
श्रीराम जय राम जय जय राम।।11।।
मित्राणि बहूनि सुखे हे राम!
दुःखे न पश्यति कोपि मे राम!।
मम चित्ते वस वस हे श्रीराम!
श्रीराम! जय राम! जय जय राम !।।12।।

**संस्कृतसंवादपाक्षिकपत्रपरिवारस्य परामर्शकः डॉ. अरविन्दकुमारतिवारी 2022 विशेषपुरस्काराय उत्तरप्रदेश--संस्कृतसंस्थानम् लक्ष्मणपुरम् द्वारा चितः। संस्कृतसंवादपरिवारो हार्दिकं वर्धापनम् अस्मै तिवारिणे अर्पयति।**

प्रेषकः पङ्कजकुमारझाः राजस्थानतः।



डॉ. अरविन्दकुमारतिवारी बिहारप्रदेशस्य गोपालगंजमण्डलान्तर्गतमटिहानीमाधोग्रामस्य वास्तव्योस्ति। 10 मार्च1979 इस्वीयवर्षे लब्ध जन्मायं श्रीमुखशाण्डिल्यगोत्रोत्पन्नो वर्तते। धार्मिकः श्रीसालिकतिवारी चास्य पिता धर्मपरायणा श्रीरामचरितमानसप्रिया श्रद्धेया दुर्गावती देवी जननी अनयोरयं सुतः संस्कृतमध्येतुं काशीमागत्य प्रातस्स्मरणीयानाम् आचार्यवासुदेवद्विवेदिशास्त्रिणां चरणरेणुं लब्ध्वा सार्वभौम-संस्कृत-प्रचारसंस्थाने संस्कृतस्य विशेषज्ञतामलभत। ततो गुरुवर्यद्विवेदिमहोदयानां वरदकरस्पर्शमवाप्य संस्कृतसेवाव्रतमेवाङ्गीकृतवान्। अनेन काशीहिन्दूविश्वविद्यालयाद् उच्चशिक्षा लब्धा। तत एवायं साङ्ख्यदर्शने चक्रवर्ती (पी.एच्.डी.) इत्युपाधिमवाप्नोत्।

शास्त्रिकक्षायां सर्वोच्चस्थानमवाप्य बी.एच.यू. स्वर्णपदकं लब्धवान्। ( २००६ वर्षतः ) उत्तरप्रदेशे बागपतजनपदे इण्टरकालेजे संस्कृतप्रवक्तृपदे सुरभारतीं सेवमानो वर्तते।

श्रीमती सुनीता तिवारी धर्मपत्नी चास्य संस्कृतकार्येषु सर्वदा सहयोगदात्री धर्मचारिणीव विलघ्क्यते। अस्य आयुष्मान् विभवतिवारी सुपुत्रः पितुः कार्ये सर्वदैव सहयोगं कुरुते।

अस्य संस्कृतसेवां विलोक्य बहुभिः संस्थानैरयं सम्मान-पुरस्कारैरलङ्कृतः, यथा

१. साहित्यपुरस्कारः उ.प्र.सं.संस्थानम्, लखनऊ २०१७
२. बाणभट्टपुरस्कारः उ.प्र.सं.सं.लखनऊ २०१९
३. बालसाहित्यपुरस्कारः उ.प्र.सं.सं.लखनऊ. २०१९
४. सम्पादकपुरस्कारः, दिल्ली पब्लिक लाइब्रेरी, २०१९
५. बालसाहित्यपुरस्कारः, साहित्य-अकादेमी, भारतसर्वकारः, दिल्ली, २०२०
६. विश्वभारतीसम्मानः, विश्वभारती संस्था , भदोही २०२०
७. संस्कृतसाहित्यसम्मानः, चातुर्वेदसंस्कृयप्रचारसंस्थानम्, वाराणसी २०२०
८. राष्ट्ररत्नसम्मानः, वाग्योगचेतनापीठम्, वाराणसी २०२०
९. प्रतिभा-प्रमोदनम्, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालयः, दिल्ली २०२२
(विश्वविद्यायस्य कुलगीतरचनार्थम्)
१०. युवा सर्जना पुरस्कार, नान्दीसेवासंस्थान, वाराणसी
११ संस्कृतसेवासम्मान, पंचामृत धाम

साक्षात्कारः
१. वारद्वयं रेडियोसाक्षात्कारः
२. वार्तावलीसाक्षात्कारः

परिकल्पकः
१ अमरवाणीकविपरिषद्ः

सम्पादकः
क. काव्यामृतवर्षिणी, षाण्मासिकपत्रिकायाः
ख. संस्कृतसंवादपाक्षिकपत्रस्य परामर्शदाता
ग. संस्कृतसर्जनापरामर्शकः

अस्य प्रकाशिताः कृतयः'''
१. सांख्यमुक्तावली
२ वासुदेवचरितम् ( १२सर्गाः)
३. अन्योक्ति-निर्झरः
४. काव्योद्यानम्
५ हा हन्त( उपन्यासः।)
६. नीतिकल्पद्रुमः
७. बालगुञ्जनम्
८. पञ्चाशिकात्रयम् ( दिनचतुष्टये रचितम्)
९. वरिवस्या
१०. योगिविजयम्
११.काव्यसुधाब्धिः(चलकविसमवायः)
१२. काव्यालंकृतिः
१३. सूक्तिसौरभम्
१४. श्रीरामचरितम् (अरविन्दरामायणम्) २२ सर्गाः, ५० दिवसेषु रचितम्
१५. कोरोनासन्देशम्, २२५ मन्दाक्रान्ताच्छन्दसि
१६. दिव्यकुम्भः, एकस्मिन् दिवसे रचितः।
१७. संस्कृतनिबन्धावलिः
१८. अभिराजचरितम्, ८ सर्गेषु
१९. कोरोनिक्रमणम्, नाटकम्, सप्ताङ्केषु
२०. गलज्जलिकोर्मिः
२१. सुरभारती के अनन्य समुपासक आचार्य वासुदेव द्विवेदी शास्त्री २२ नाट्यत्रयी, कन्यारत्नम्, अमृतसञ्चयम्, लोकतन्त्रम्, (लोकतन्त्रस्य मञ्चनं ६ अप्रैल२०१९ उ.प्र.सं.सं. लखनऊ द्वारा)
२३ पद्यबोधिनी
२४. स्वातन्त्र्यरसायनम्, सम्पादन
२५. कविमधु
२६. कथा वाटिका
२७. अभिनवबालकवितावली
२८. शारदायनम्, सम्पादनम्
२९. संख्यसिद्धान्तकौमुदी प्रकाशनाधीना
३०. श्रीरामोत्सवः राष्ट्रगौरव, हिन्दीरचना, प्रकाशनाधीना
३१. आचार्यकृष्णकान्तशर्मा अभिनन्दन ग्रन्थ सम्पादकः , प्रकाशनाधीनः

अनेककार्यक्रमाणाम् आयोजकः, संयोजकः, सञ्चालकः, विविधपत्रपत्रिकासु अगणितकाव्यलेखप्रकाशनम्, बहुश्रुतसङ्गोष्ठीषु शोधपत्रवाचनम्, अनेकसंस्कृतप्रतियोगितासु निर्णायकत्वम्।

प्रतिष्ठितसंस्कृताकादमीषु संस्कृतसंस्थानेषु बहुधा काव्यपाठो यथा
१. साहित्य-अकादमी, दिल्ली
२. कालिदास-अकादमी, उज्जैनम्
३. उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनऊ
४. उत्तराखंड-संस्कृत-अकादमी, उत्तराखण्डः

शताधिकबर्चुवलकार्यक्रमेषु काव्यपाठप्रस्तुतिः, व्याख्यानप्रदानञ्च।

जीवनस्य लक्ष्यम्
१ . आचार्यवासुदेवद्विवेदिशास्त्रिणां मार्गानुसरणम्।

---

पंचमपुटस्य शेषभागः

## श्रीमद्भगवद्गीतोक्ता दैवीसम्पत्....

संदर्भसूची-


१. गीता-२/२,३
२. दृष्ट्वा रूपे व्याकरोत्सत्यानृते प्रजापतिः।
अश्रद्धामनृनेऽदधाच्छ्रद्धां सत्ये प्रजापतिः यजु-१९/७७
३. गीता-१६/६
४. 'शांकर भाष्य, गीता-१६/६
५. गीता-१६/६
६. तत्रैव-४/७०, ५/६
७. भर्तृहरि, वैराग्यशतकम्
८. शांकरभाष्य, गीता-१६/१
९. गीता-१४/११
१०. साधकसंजीवनी टीका, स्वामी रामसुखदास, गीता-१६/१
११. शांकरभाष्यम्, गीता-१६/१
१२. गीता-४/३८
१३. शांकरभाष्यम्, गीता-१६/१
१४. तत्रैव
१५. गीता-१७/२०-२२
१६. तैत्तिरीयोपनिषद् शिक्षावल्ली-१६/९
१७. गीता-१७/२८
१८. उद्धृत्, साधकसंजीवनीटीका, गीता- १६/९
१९. वेदान्तसारे, साधनचतुष्टय वर्णनम्
२०. गीता-२/६०, ६८
२१. गीता-४/२४-३०
२२. गीता-४/३३-३७
23. गीता-१७/११-१३
२४. साधक संजीवनी टीका-गीता-१६/१
२५. शांकरभाष्यम्, गीता-१६/१
२६. गीता-१७/१५
२७. गीता-१७/१४-१६
२८. गीता-१७/१७
२९. द्र. शांकरभाष्यम्, गीता-१६/१
३०. गीता-१८/४२
३१. अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः-योगदर्शनः-२/३५
३२. द्र. शांकरभाष्यम्, गीता-१६/२
३३. सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्। योगदर्शन-२/३६
३४. द्रशांकरभाष्यम्, गीता-१६/२
३५. गीता-१८/४
३६. गीता-१८/९, ८,७
३७. द्र. गीता-२/७०-७१, ५/१२
३८. द्र. शांकरभाष्यम्, गीता-१६/२
३९. द्र. वेदान्तसारे, साधनचतुष्टयवर्णनम्,
४०. गीता-१२/१३
४१. साधक संजीवनी टीका-गीता-१६/२
४२. द्र. शांकरभाष्य, गीता-१६/२
४३. गीता-६/२६
४४. माघ-३/११
४५. द्र. शांकरभाष्य, गीता-१६/३
४६. द्र. शांकरभाष्य, गीता
४७. गीता-१८/३३-३५
४८. द्र. शांकरभाष्य, गीता-१६/३


**साभारः सुधीवैभवम्**

---


**पाठकानां कृते सूचना**

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142, Indian Overseas Bank, Yamuna Vihar, Delhi-110053**
**IFC Code- IOBA0002249**


---

# सुवर्णपिच्छम्

**मूलगुजरातीकथाकर्त्री-कालिन्दी-वसन्तभाई-परीख**

**अनुसर्जकः-मधुसूदनव्यासः**

गुर्जरप्रदेशे गीर-नामके अरण्ये मोरसरः नाम ग्रामः वर्तते। बहुवर्षेभ्यः पूर्वं तत्र 'धनजी'-नामा कश्चन कृषीवलः वसति। स्म। तस्य भार्याऽपि सुशीला, तत्रः पुत्राः अपि आज्ञाकारिणः भवन्ति स्म। ते सर्वे कृषिकार्येण प्राप्तेन धनेन सन्तुष्टाः। सः कृषक अन्नवस्त्रादिभिः परिवारस्य साधुनिर्वाह करोति स्म।

किन्तु वर्षद्वयं यावत् दुर्भिक्षम् आपतितम्। अतः कृषिकार्यं स्तम्भितम् एव। तस्य वृत्तिः समाप्ता। सः कदाचित् कार्यं प्राप्तोनति कदाचित् न प्रान्पोति। तेन अभावचिन्ताग्रस्ता तस्य पत्नी रुग्णा सञ्जाता। गृहेऽति अन्न्म् न्यूनीभूतम्। एवम् एव वस्त्राभावः अपि सञाजतः। तस्य आवासः अपि जीर्णतां गतः। अतीव दारिद्यपीडितः धनजी खिन्नः अभवत्।

एकदा स स्वजीर्णगृहस्य बर्हिभागे उपविष्टः आसीत् तदा कोऽपि मयूरः तत्र आगतः। स मनुष्यवाचा अकथयत् ''वदतु मे भ्रातः। कथम् इत्थं खिन्नः उपविष्टोऽसि'' मनुष्यवाचा मयूरस्य संवादः एव धनजी-कृते विस्मयकरः अभवत्। तस्य मनसि कुतूहलं जातम्। स्वकर्णयोः अविश्वस्ते तस्मिन् मयूरः पुररेकवारम् अवोचत् ''कथय कथय मां तव खिन्नतायाः कारणम्। अहं तव सहायो भविष्यामि।''

अथ धनजी-वर्येण सर्व कथितम्।

मयूरेण धनजीवृत्तं श्रुत्वा कथितम् ''अहं तुभ्यं प्रतिदिनं पिच्छम् एकम् दास्यामि। तत् पिच्छं हस्ते निधाय भवभ्दिः मन्त्रः उच्चरणीय।'' धनजी अकथयत् ''कः मन्त्रः उच्चारणीयः?'

मयूरपिच्छ मयूरपिच्छ
त्वं तु भव सुवर्णपिच्छम्।

अयं मन्त्रः त्रि उच्चारणीयः। ततः तत् पिच्छम् सुवर्णपिच्छं भविष्यति। मयूरस्य वाणीं श्रुत्वा धनजीवर्यस्य मुख काचित् आशा प्रकटिता। तेन सत्वरं मयूरस्य कथनं स्वीकृतम्।

ततः प्रतिदिनं तस्य निवासस्थानं मयूरः आगच्छति स्म। एवमेव तस्मै एकम् एकं पिच्छम् दत्वा निर्गच्छति स्म। धनजी अपि प्रतिदिनं मन्त्रोच्चारणं करोति स्म।

अथ मयूरपिच्छं सुवर्णमयं भवति स्म। अतः धनजी अतीव प्रसन्नो भूत्वा सपरिवारम् आनन्देन दिनानि यापयति। स तु सुवर्णपिच्छम् गृहीत्वा सुवर्णकाराय आपणिकाय अयच्छत्। सुवर्णकारेणपि तस्मै बहूनि रूप्यकाणि दतानि। एतस्मात् धनात् तेन स्वभार्यायै औषधानि फलानि च क्रीतानि। बालकानां कृते मिष्टान्नानि वस्त्राणि च गृहीतानि। तत्पश्चात् तस्य गृहे धान्यभाण्डागाराः अपि पूरिताः। नूतनानि पात्राणि च अन्यानि गृहोपकरणनि च आगतानि। एतैः तस्य गृहं सुसमद्धं सञजातम्। अथ धनजीवर्येण स्वगृहमपि विशालम् कृतम। एवं स समृद्धोऽभवत्।

परन्तु प्रकृत्या धनजी सन्तोषपरायणः जीवः आसीत् श्रमजीवी अपि आसीत्। तेन विचारितं यत् विना कार्यम् उपार्जनं न योग्यम्। अतः किञ्चित् करणीयम्। अतः तेन क्षेत्रं स्वीकृत्य तस्मिन क्षेत्रे कृषिकार्यम् आरब्धम्। तत्र भूयान् श्रमः कृतः वृष्टिरपि तदा सुष्ठु जाता। अतः कालक्रमेणा धान्यपुष्टं दृष्टा सः आनन्दपरायणः सञजातः।

अन्ते धनजी मयूरम् अकथयत् यत् सम्प्रति मा आगच्छ पिच्छदानाय। येभ्यः तस्य आवश्यकता वर्तते तेभ्यो दीयताम् इति। अधुना तव पिच्छदानेनाहं समृद्धोऽभवम्। अतः तवोपकारं सदा स्मरिष्यामि। **साभारः कथासरित**

# विकाससंबद्धाः वैदिकविज्ञानकेन्द्रस्य भावी योजनानां विषये चर्चा जाता

तत्र प्रो. धीरेन्द्र पाल सिंहः, शिक्षा परामर्शकः, उत्तर प्रदेश सर्वकारः, पूर्व अध्यक्षः, विश्वविद्यालय अनुदान आयोगः, पूर्व कुलपतिः, काशी हिन्दू विश्वविद्यालय केन्द्रस्य संचालन समित्या अन्य सदस्यैः सह



''केन्द्रस्य विकासः'' इतिविषये एका परिचर्चा सम्पन्ना। परिचर्चायाः आरम्भः महामनसः मदन मोहन मालवीय प्रतिमायां माल्यार्पणेन एवं च वैदिक मंगलाचरणेन सह जातः। अतिथिरूपेण प्रो. धीरेन्द्र पाल सिंहः केन्द्रस्क्ष गतिविधिषु प्रसन्नतां व्यक्तीकुर्वन् यत् कथितवान् केन्द्रमिदं एकम् अन्तर्विषयी अनुसंधान केन्द्र रूपेण विकासितव्यम्।

अध्यक्षतां कुर्वन् प्रो. हृदय रंजन शर्मा, सदस्य संचालन समितिं, वैदिक विज्ञान केन्द्रं च आधृत्य उक्तवान् यत् वयम् उच्चस्तरीय शोधे शिक्षण क्षेत्रे अग्रणिनो भवितुं कृतसंकल्पाः स्मः। संचालनं प्रो. मृत्युंजय देव पाण्डेयः, रसायन विज्ञान विभागः, का.हि.वि.वि. स्वागतं धन्यवाद ज्ञापनं केन्द्रस्य समन्वयकः प्रो. उपेन्द्र कुमार त्रिपाठी अकरोत्। अवसरेस्मिन् प्रो. कमलेश झा, संकाय प्रमुखः, संस्कृतविद्या धर्मविज्ञान संकायः, प्रो. हरिहृदय अवस्थी, प्रा. प्रेम कुमार उपाध्यायः, प्रो. प्रेम प्रकाश सोलंकी, प्रो. शैलेन्द्र कुमार गुप्ता, डॉ. मयंक प्रतापः, प्रो. देवेन्द्र मिश्रः, डॉ. के.एम. त्रिपाठी, प्रो. राजकुमारः, डॉ. एस.एल. मौर्या, डॉ. डी.एस. त्रिपाठी, डॉ. आशा शुक्ला, डॉ. जी.एन. तिवारी श्री पवन कुमार मिश्रः, डॉ. कुमकुम पाठकः इत्येतैः सहिताः प्रमुखतया उपस्थिताः आसन्।




उपरि वर्णितस्य औषधस्य उपयोगः परामर्शमात्रम् । उपर्युक्तरोगाणां प्रबंधनाय उपचारे अस्य मुख्यतः प्रयोगः क्रियते। स्वविवेकेन औषधं नैव ग्राह्यम्। प्रयोगस्य सदैव चिकित्सकीय निरीक्षणे करणीयम्।


# डॉ. राजकुमारमिश्रः कालिदासपुरस्कारेण पुरस्कृतः



संस्कृतस्य सुप्रथितः कविः डॉ. राजकुमारमिश्रः उत्तरप्रदेशसंस्कृतसंस्थानेन २०२२ वर्षस्य नामितपुरस्कारान्तर्वर्तिना कालिदासपुरस्कारेण पुरस्कृत इति गौरवास्पदोदन्तः। डॉ. राजकुमारमिश्रः अमुं पुरस्कारं स्वप्रणीत- 'अभिज्ञानम्' इति काव्यसङ्ग्रहोपरि प्रापत्। डॉ. राजकुमारमिश्रः अर्वाचीनं संस्कृतवाङ्मयं स्वबहुविधया पुष्कलरचनया अनवरतं समेधयमानो वर्तत इति विदितमेव विदुषाम्। डॉ. मिश्रः काश्यां लब्धजनिः लब्धशिक्षश्च वर्तते, सम्प्रति च हरियाणासंस्कृतविद्यापीठे साहित्यविभागे सहाचार्यपदे सेवां विधत्ते। डॉ. राजकुमारमिश्रः पारम्परिकच्छन्दः, कुण्डलिया, घनाक्षरी, कथा, नाटकं, गीतम् इत्यादिविधायां मधुरमधुरं काव्यं गुम्फति। एतेन साकम् अनुवादः, समीक्षा इत्यादिक्षेत्रेऽपि स्वलेखनीं व्यापारयति। डॉ. मिश्रः विविधैः प्रतिष्ठितैः पुरस्कारैरपि सभाजितो वर्तते । येषु साहित्य अकादमी युवपुरस्कारः, साहित्य अकादमीबालसाहित्यपुरस्कारः, उत्तरप्रदेशसंस्कृतसंस्थानस्य विशेषपुरस्कारः, विविधपुरस्कारः, प्रतापनारायणमिश्रसाहित्यकारसम्मानः, उत्तराखण्डसंस्कृताकादमीनाटकलेखनपुरस्कारः मुख्याः सन्ति। डॉ. राजकुमारमिश्रप्रणीतेषु काव्येषु भारतभूषणम्, डयते कथमाकाशे, सङ्गता, अभिज्ञानम् प्रमुखानि काव्यानि सन्ति।

**'ऐषमो नवदिल्लीविश्वपुस्तकमेलकस्य मध्ये आयोज्यमानानां साहित्यिक कार्यक्रमाणाम् अन्तर्गतं साहित्याकादेम्या फरवरी-चतुर्दश्यां 'युवा साहिती कार्यक्रमः' आयोजितः।**

# विश्वपुस्तकमहामेलके साहित्याकदेम्याः समनुष्ठिता काव्यगोष्ठी

संस्कृत-हिन्दी-पञ्जाबी-ऊर्दू चेति भाषाणां रचनाकारैः कृतः काव्यपाठः




नवदिल्लीः राजधान्यां दिल्ल्यां साहित्याकदेम्या एका बहुभाषीया काव्यगोष्ठ्याः समनुष्ठानं प्रख्यातसंस्कृतकवेः पत्रकारस्य, शिक्षकस्य च डॉ. युवराजभट्टराईवर्यस्य अध्यक्षतायां विहितम्। अस्यां काव्यगोष्ठ्यां शाचीन्द्रः आर्यः हिन्दीभाषायां, गुरुसेवकसिंहः पञ्जाबीभाषायां रिजवान खानः च ऊर्दूभाषायां, निज-रचनाः श्रोतृजनानां पुरतः प्रस्तुतवन्तः। कविसम्मेलनस्य सुचारुतया सञ्चालनं साहित्याकादम्याः अधिकारिणा अजयकुमारमीणा-वर्येण सम्यक् सम्भालितम्। एतस्य कविसम्मेलनस्य प्रारम्भे साहित्याकादेम्याः सम्पादनाधिकारिणा अजयकुमारशर्म-महाभागेन अतिथीनां कवीनां च स्वागतसपर्या सम्पादिता। साकमेव समेषां निमन्त्रितानां कवीनां समग्र-साहित्यिक-गतिविधीनां परिचय-पूर्वकं तेषामपि परिचयः श्रोतृजनानां पुरतः उपस्थापितः। ततः परं काव्यगोष्ठी सुतरां प्रचलिता अभूत् । हिन्दी-पञ्जाबी-ऊर्दू-कविभिः क्रमशः रचनापाठः प्रस्तुतः। तदनु अस्य काव्य सम्मेलनस्य अध्यक्षेण समवाप्तसाहित्याकादेमीयुवपुस्कारेण डॉ. युवराजभट्टराई-महोदयेन समेषां कवीनां रचनाविषये आध्यक्षीयं वक्तव्यं प्रदाय तासां राचनानाम् औचितीः, सामायिकताः च प्रतिपाद्य समाजे काव्यस्य प्रभावविषयेपि सुतरां प्रतिपादितम्। ततः परम् अमुना संस्कृतस्य पारम्परिक-छन्दस्सु नूतनसन्दर्भान् संयोज्य विरचिताः निजकविताः संश्राव्य श्रोतारो मन्त्रमुग्धीकृता। कवि सम्मेलनस्य अवसाने साहित्याकादेम्याः सर्वेभ्यः कविवरेभ्यः श्रोतृजनेभ्यः कार्यकर्तृभ्यः च आभारभारः प्रकटितः। अस्मिन् कवि सम्मेलने विविधभाषाभाषीयाणां पारेशतं श्रोतृजनानां काव्यप्रेमिणां चाप्युपस्थितिः अवर्तत।







अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी, प्रो.(डॉ.)अजितकुमारजैनः
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।